ह दार्भ्यम् दार्भ्य(ग्म्) ह ह दार्भ्यम् ।

11) 2.6.2.3(10)- दार्भ्यम् । केशी ।

दार्भ्यम् केशी केशी दार्भ्यम् दार्भ्यम् केशी ।

12) 2.6.2.3(11)- केशी । सात्यकामिः ।

केशी सात्यकामिः सात्यकामिः केशी केशी सात्यकामिः ।

13) 2.6.2.3(12)- सात्यकामिः । उवाच ।

सात्यकामि रुवाचोवाच सात्यकामिः सात्यकामि रुवाच ।

14) 2.6.2.3(12)- सात्यकामिः ।

सात्यकामिरिति सात्य - कामिः ।

15) 2.6.2.3(13)- उवाच । सप्तपदाम् ।

उवाच सप्तपदा(ग्म्) सप्तपदा मुवाचोवाच सप्तपदाम् ।

16) 2.6.2.3(14)- सप्तपदाम् । ते ।

सप्तपदाम् ते ते सप्तपदा(ग्म्) सप्तपदाम् ते ।

17) 2.6.2.3(14)- सप्तपदाम् ।

सप्तपदामिति सप्त - पदाम् ।

18) 2.6.2.3(15)- ते । शक्वरीम् ।

ते शक्वरी(ग्म्) शक्वरीम् ते ते शक्वरीम् ।

19) 2.6.2.3(16)- शक्वरीम् । श्वः ।

शक्वरी(ग्ग्) श्वः श्वः शक्वरी(ग्म्) शक्वरी(ग्ग्) श्वः ।

20) 2.6.2.3(17)- श्वः । यज्ञे ।

श्वो यज्ञे यज्ञे श्वः श्वो यज्ञे ।

21) 2.6.2.3(18)- य॒ज्ञे । प्र॒यो॒क्तासे᳚ ।

य॒ज्ञे प्र॑यो॒क्तासे᳚ प्रयो॒क्तासे॑ य॒ज्ञे य॒ज्ञे प्र॑यो॒क्तासे᳚ ।

22) 2.6.2.3(19)- प्र॒यो॒क्तासे᳚ । यस्यै᳚ ।

प्र॒यो॒क्तासे॒ यस्यै॒ यस्यै᳚ प्रयो॒क्तासे᳚ प्रयो॒क्तासे॒ यस्यै᳚ ।

23) 2.6.2.3(19)- प्र॒यो॒क्तासे᳚ ।

प्र॒यो॒क्ता॒स॒ इति॑ प्र – यो॒क्तासे᳚ ।

24) 2.6.2.3(20)- यस्यै᳚ । वी॒र्ये॑ण ।

यस्यै॑ वी॒र्ये॑ण वी॒र्ये॑ण॒ यस्यै॒ यस्यै॑ वी॒र्ये॑ण ।

25) 2.6.2.3(21)- वी॒र्ये॑ण । प्र ।

वी॒र्ये॑ण॒ प्र प्र वी॒र्ये॑ण वी॒र्ये॑ण॒ प्र ।

26) 2.6.2.3(22)- प्र । जा॒तान् ।

प्र जा॒तान् जा॒तान् प्र प्र जा॒तान् ।

27) 2.6.2.3(23)- जा॒तान् । भ्रातृ॑व्यान् ।

जा॒तान् भ्रातृ॑व्या॒न् भ्रातृ॑व्यान् जा॒तान् जा॒तान् भ्रातृ॑व्यान् ।

28) 2.6.2.3(24)- भ्रातृ॑व्यान् । नु॒दते᳚ ।

भ्रातृ॑व्यान् नु॒दते॑ नु॒दते॒ भ्रातृ॑व्या॒न् भ्रातृ॑व्यान् नु॒दते᳚ ।

29) 2.6.2.3(25)- नु॒दते᳚ । प्रति॑ ।

नु॒दते॒ प्र॒ति प्रति॑ नु॒दते॑ नु॒दते॒ प्रति॑ ।

30) 2.6.2.3(26)- प्रति॑ । ज॒नि॒ष्यमा॑णान् ।

प्रति॑ जनि॒ष्यमा॑णान् जनि॒ष्यमा॑णा॒न् प्रति॒ प्रति॑ जनि॒ष्यमा॑णान् ।

31) 2.6.2.3(27)- जनिष्यमाणान् । यस्यै ।

जनिष्यमाणान्. यस्यै यस्यै जनिष्यमाणान् जनिष्यमाणान्. यस्यै ।

32) 2.6.2.3(28)- यस्यै । वीर्येण ।

यस्यै वीर्येण वीर्येण यस्यै यस्यै वीर्येण ।

33) 2.6.2.3(29)- वीर्येण । उभयोः ।

वीर्येणोभयो रुभयोर् वीर्येण वीर्येणोभयोः ।

34) 2.6.2.3(30)- उभयोः । लोकयोः ।

उभयोर् लोकयोर् लोकयो रुभयो रुभयोर् लोकयोः ।

35) 2.6.2.3(31)- लोकयोः । ज्योतिः ।

लोकयोर् ज्योतिर् ज्योतिर् लोकयोर् लोकयोर् ज्योतिः ।

36) 2.6.2.3(32)- ज्योतिः । धत्ते ।

ज्योतिर् धत्ते धत्ते ज्योतिर् ज्योतिर् धत्ते ।

37) 2.6.2.3(33)- धत्ते । यस्यै ।

धत्ते यस्यै यस्यै धत्ते धत्ते यस्यै ।

38) 2.6.2.3(34)- यस्यै । वीर्येण ।

यस्यै वीर्येण वीर्येण यस्यै यस्यै वीर्येण ।

39) 2.6.2.3(35)- वीर्येण । पूर्वार्द्धेन ।

वीर्येण पूर्वार्द्धेन पूर्वार्द्धेन वीर्येण वीर्येण पूर्वार्द्धेन ।

40) 2.6.2.3(36)- पूर्वार्द्धेन । अनड्वान् ।

पूर्वार्द्धेना नड्वा ननड्वान् पूर्वार्द्धेन पूर्वार्द्धेना नड्वान् ।

41) 2.6.2.3(36)- पूर्वार्द्धेन ।

पूर्वार्द्धेनेति पूर्व - अर्द्धेन ।

42) 2.6.2.3(37)- अनड्वान् । भुनक्ति ।

अनड्वान् भुनक्ति भुनक्त्यनड्वा ननड्वान् भुनक्ति ।

43) 2.6.2.3(38)- भुनक्ति । जघनार्द्धेन ।

भुनक्ति जघनार्द्धेन जघनार्द्धेन भुनक्ति भुनक्ति जघनार्द्धेन ।

44) 2.6.2.3(39)- जघनार्द्धेन । धेनुः ।

जघनार्द्धेन धेनुर् धेनुर् जघनार्द्धेन जघनार्द्धेन धेनुः ।

45) 2.6.2.3(39)- जघनार्द्धेन ।

जघनार्द्धेनेति जघन - अर्द्धेन ।

46) 2.6.2.3(40)- धेनुः । इति ।

धेनु रितीति धेनुर् धेनु रिति ।

47) 2.6.2.3(41)- इति । पुरस्ताल्लक्ष्मा ।

इति पुरस्ताल्लक्ष्मा पुरस्ताल्लक्ष्मेतीति पुरस्ताल्लक्ष्मा ।

48) 2.6.2.3(42)- पुरस्ताल्लक्ष्मा । पुरोनुवाक्या ।

पुरस्ताल्लक्ष्मा पुरोनुवाक्या पुरोनुवाक्या पुरस्ताल्लक्ष्मा पुरस्ताल्लक्ष्मा पुरोनुवाक्या ।

49) 2.6.2.3(42)- पुरस्ताल्लक्ष्मा ।

पुरस्ताल्लक्ष्मेति पुरस्तात् - लक्ष्मा ।

50) 2.6.2.3(43)- पुरोनुवाक्या । भवति ।

पुरोनुवाक्या भवति भवति पुरोनुवाक्या पुरोनुवाक्या भवति ।

51) 2.6.2.3(43)- पुरोनुवाक्या ।

पुरोनुवाक्येति पुरः - अनुवाक्या ।

52) 2.6.2.3(44)- भवति । जातान् ।

भवति जातान् जातान् भवति भवति जातान् ।

53) 2.6.2.3(45)- जातान् । एव ।

जाता नेवैव जातान् जाता नेव ।

54) 2.6.2.3(46)- एव । भ्रातृव्यान् ।

एव भ्रातृव्यान् भ्रातृव्या नेवैव भ्रातृव्यान् ।

55) 2.6.2.3(47)- भ्रातृव्यान् । प्र ।

भ्रातृव्यान् प्र प्र भ्रातृव्यान् भ्रातृव्यान् प्र ।

56) 2.6.2.3(48)- प्र । नुदते ।

प्र णुदते नुदते प्र प्र णुदते ।

57) 2.6.2.3(49)- नुदते । उपरिष्टाल्लक्ष्मा ।

नुदत उपरिष्टाल्ल क्ष्मोपरिष्टाल्लक्ष्मा नुदते नुदत उपरिष्टाल्लक्ष्मा ।

58) 2.6.2.3(50)- उपरिष्टाल्लक्ष्मा । याज्या ।

उपरिष्टाल्लक्ष्मा याज्या याज्योपरिष्टाल्ल क्ष्मोपरिष्टाल्लक्ष्मा याज्या ।

59) 2.6.2.3(50)- उपरिष्टाल्लक्ष्मा ।

उपरिष्टाल्लक्ष्मेत्युपरिष्टात् - लक्ष्मा ।

1) 2.6.2.4(1)- याज्या । जनिष्यमाणान् ।

याज्या जनिष्यमाणान् जनिष्यमाणान्. याज्या याज्या जनिष्यमाणान् ।

2) 2.6.2.4(2)- जनिष्यमाणान् । एव ।

जनिष्यमाणा नेवैव जनिष्यमाणान् जनिष्यमाणा नेव ।

3) 2.6.2.4(3)- एव । प्रति ।

एव प्रति प्रत्येवैव प्रति ।

4) 2.6.2.4(4)- प्रति । नुदते ।

प्रति नुदते नुदते प्रति प्रति नुदते ।

5) 2.6.2.4(5)- नुदते । पुरस्ताल्लक्ष्मा ।

नुदते पुरस्ताल्लक्ष्मा पुरस्ताल्लक्ष्मा नुदते नुदते पुरस्ताल्लक्ष्मा ।

6) 2.6.2.4(6)- पुरस्ताल्लक्ष्मा । पुरोनुवाक्या ।

पुरस्ताल्लक्ष्मा पुरोनुवाक्या पुरोनुवाक्या पुरस्ताल्लक्ष्मा पुरस्ताल्लक्ष्मा पुरोनुवाक्या ।

7) 2.6.2.4(6)- पुरस्ताल्लक्ष्मा ।

पुरस्ताल्लक्ष्मेति पुरस्तात् – लक्ष्मा ।

8) 2.6.2.4(7)- पुरोनुवाक्या । भवति ।

पुरोनुवाक्या भवति भवति पुरोनुवाक्या पुरोनुवाक्या भवति ।

9) 2.6.2.4(7)- पुरोनुवाक्या ।

पुरोनुवाक्येति पुरः – अनुवाक्या ।

10) 2.6.2.4(8)- भवति । अस्मिन्न् ।

भव त्यस्मिन् नस्मिन् भवति भव त्यस्मिन्न् ।

11) 2.6.2.4(9)- अस्मिन्न् । एव ।

अस्मिन् नेवैवास्मिन् नस्मिन् नेव ।

12) 2.6.2.4(10)- एव । लोके ।

एव लोके लोक एवैव लोके ।

13) 2.6.2.4(11)- लोके । ज्योतिः ।

लोके ज्योतिर् ज्योतिर् लोके लोके ज्योतिः ।

14) 2.6.2.4(12)- ज्योतिः । धत्ते ।

ज्योतिर् धत्ते धत्ते ज्योतिर् ज्योतिर् धत्ते ।

15) 2.6.2.4(13)- धत्ते । उपरिष्टाल्लक्ष्मा ।

धत्त उपरिष्टाल्ल क्ष्मोपरिष्टाल्लक्ष्मा धत्ते धत्त उपरिष्टाल्लक्ष्मा ।

16) 2.6.2.4(14)- उपरिष्टाल्लक्ष्मा । याज्या ।

उपरिष्टाल्लक्ष्मा याज्या याज्योपरिष्टाल्ल क्ष्मोपरिष्टाल्लक्ष्मा याज्या ।

17) 2.6.2.4(14)- उपरिष्टाल्लक्ष्मा ।

उपरिष्टाल्लक्ष्मेत्युपरिष्टात् - लक्ष्मा ।

18) 2.6.2.4(15)- याज्या । अमुष्मिन्न् ।

याज्या ऽमुष्मिन् नमुष्मिन्. याज्या याज्या ऽमुष्मिन्न् ।

19) 2.6.2.4(16)- अमुष्मिन्न् । एव ।

अमुष्मिन् नेवैवामुष्मिन् नमुष्मिन् नेव ।

20) 2.6.2.4(17)- एव । लोके ।

एव लोके लोक एवैव लोके ।

21) 2.6.2.4(18)- लोके । ज्योतिः ।

लोके ज्योतिर् ज्योतिर् लोके लोके ज्योतिः ।

22) 2.6.2.4(19)- ज्योतिः । धत्ते ।

ज्योतिर् धत्ते धत्ते ज्योतिर् ज्योतिर् धत्ते ।

23) 2.6.2.4(20)- धत्ते । ज्योतिष्मन्तौ ।

धत्ते ज्योतिष्मन्तौ ज्योतिष्मन्तौ धत्ते धत्ते ज्योतिष्मन्तौ ।

24) 2.6.2.4(21)- ज्योतिष्मन्तौ । अस्मै ।

ज्योतिष्मन्ता वस्मा अस्मै ज्योतिष्मन्तौ ज्योतिष्मन्ता वस्मै ।

25) 2.6.2.4(22)- अस्मै । इमौ ।

अस्मा इमा विमा वस्मा अस्मा इमौ ।

26) 2.6.2.4(23)- इमौ । लोकौ ।

इमौ लोकौ लोका विमा विमौ लोकौ ।

27) 2.6.2.4(24)- लोकौ । भवतः ।

लोकौ भवतो भवतो लोकौ लोकौ भवतः ।

28) 2.6.2.4(25)- भवतः । यः ।

भवतो यो यो भवतो भवतो यः ।

29) 2.6.2.4(26)- यः । एवम् ।

य एव मेवं ँयो य एवम् ।

30) 2.6.2.4(27)- एवम् । वेद ।

एवं ँवेद वेदैव मेवं ँवेद ।

31) 2.6.2.4(28)- वेद । पुरस्ताल्लक्ष्मा ।

वेद पुरस्ताल्लक्ष्मा पुरस्ताल्लक्ष्मा वेद वेद पुरस्ताल्लक्ष्मा ।

32) 2.6.2.4(29)- पुरस्ताल्लक्ष्मा । पुरोनुवाक्या ।

पुरस्ताल्लक्ष्मा पुरोनुवाक्या पुरोनुवाक्या पुरस्ताल्लक्ष्मा पुरस्ताल्लक्ष्मा पुरोनुवाक्या ।

33) 2.6.2.4(29)- पुरस्ताल्लक्ष्मा ।

पुरस्ताल्लक्ष्मेति पुरस्तात् - लक्ष्मा ।

34) 2.6.2.4(30)- पुरोनुवाक्या । भवति ।

पुरोनुवाक्या भवति भवति पुरोनुवाक्या पुरोनुवाक्या भवति ।

35) 2.6.2.4(30)- पुरोनुवाक्या ।

पुरोनुवाक्येति पुरः - अनुवाक्या ।

36) 2.6.2.4(31)- भवति । तस्मात् ।

भवति तस्मात् तस्माद् भवति भवति तस्मात् ।

37) 2.6.2.4(32)- तस्मात् । पूर्वार्द्धेन ।

तस्मात् पूर्वार्द्धेन पूर्वार्द्धेन तस्मात् तस्मात् पूर्वार्द्धेन ।

38) 2.6.2.4(33)- पूर्वार्द्धेन । अनड्वान् ।

पूर्वार्द्धेना नड्वा ननड्वान् पूर्वार्द्धेन पूर्वार्द्धेना नड्वान् ।

39) 2.6.2.4(33)- पूर्वार्द्धेन ।

पूर्वार्द्धेनेति पूर्व - अर्द्धेन ।

40) 2.6.2.4(34)- अनड्वान् । भुनक्ति ।

अनड्वान् भुनक्ति भुन क्त्यनड्वा ननड्वान् भुनक्ति ।

41) 2.6.2.4(35)- भुनक्ति । उपरिष्टाल्लक्ष्मा ।

भुन क्त्युपरिष्टाल्ल क्ष्मोपरिष्टाल्लक्ष्मा भुनक्ति भुन क्त्युपरिष्टाल्लक्ष्मा ।

42) 2.6.2.4(36)- उपरिष्टाल्लक्ष्मा । याज्या ।

उपरिष्टाल्लक्ष्मा याज्या याज्योपरिष्टाल्ल क्ष्मोपरिष्टाल्लक्ष्मा याज्या ।

43) 2.6.2.4(36)- उपरिष्टाल्लक्ष्मा ।

उपरिष्टाल्लक्ष्मेत्युपरिष्टात् - लक्ष्मा ।

44) 2.6.2.4(37)- याज्या । तस्मात् ।

याज्या तस्मात् तस्माद् याज्या याज्या तस्मात् ।

45) 2.6.2.4(38)- तस्मात् । जघनार्द्धेन ।

तस्माज् जघनार्द्धेन जघनार्द्धेन तस्मात् तस्माज् जघनार्द्धेन ।

46) 2.6.2.4(39)- जघनार्द्धेन । धेनुः ।

जघनार्द्धेन धेनुर् धेनुर् जघनार्द्धेन जघनार्द्धेन धेनुः ।

47) 2.6.2.4(39)- जघनार्द्धेन ।

जघनार्द्धेनेति जघन - अर्द्धेन ।

48) 2.6.2.4(40)- धेनुः । यः ।

धेनुर् यो यो धेनुर् धेनुर् यः ।

49) 2.6.2.4(41)- यः । एवम् ।

य एव मेवं ँयो य एवम् ।

50) 2.6.2.4(42)- एवम् । वेद ।

एवं ँवेद वेदैव मेवं ँवेद ।

51) 2.6.2.4(43)- वेद । भुङ्क्तः ।

वेद भुङ्क्तो भुङ्क्तो वेद वेद भुङ्क्तः ।

52) 2.6.2.4(44)- भुङ्क्तः । एनम् ।

भुङ्क्त एन मेनम् भुङ्क्तो भुङ्क्त एनम् ।

53) 2.6.2.4(45)- एनम् । एतौ ।

एन मेता वेता वेन मेन मेतौ ।

54) 2.6.2.4(46)- एतौ । वज्रः ।

एतौ वज्रो वज्र एता वेतौ वज्रः ।

55) 2.6.2.4(47)- वज्रः । आज्यम् ।

वज्र आज्य माज्यं ँवज्रो वज्र आज्यम् ।

56) 2.6.2.4(48)- आज्यम् । वज्रः ।

आज्यं ँवज्रो वज्र आज्य माज्यं ँवज्रः ।

57) 2.6.2.4(49)- वज्रः । आज्यभागौ ।

वज्र आज्यभागा वाज्यभागौ वज्रो वज्र आज्यभागौ ।

58) 2.6.2.4(50)- आज्यभागौ । वज्रः ।

आज्यभागौ वज्रो वज्र आज्यभागा वाज्यभागौ वज्रः ।

59) 2.6.2.4(50)- आज्यभागौ ।

आज्यभागावित्याज्य - भागौ ।

1) 2.6.2.5(1)- वज्रः । वषट्कारः ।

वज्रो वषट्कारो वषट्कारो वज्रो वज्रो वषट्कारः ।

2) 2.6.2.5(2)- वषट्कारः । त्रिवृतम् ।

वषट्कार स्त्रिवृतम् त्रिवृतं ँवषट्कारो वषट्कार स्त्रिवृतम् ।

3) 2.6.2.5(2)- वषट्कारः ।

वषट्कार इति वषट् - कारः ।

4) 2.6.2.5(3)- त्रिवृतम् । एव ।

त्रिवृत मेवैव त्रिवृतम् त्रिवृत मेव ।

5) 2.6.2.5(3)- त्रिवृतम् ।

त्रिवृतमिति त्रि - वृतम् ।

6) 2.6.2.5(4)- एव । वज्रम् ।

एव वज्रं ँवज्र मेवैव वज्रम् ।

7) 2.6.2.5(5)- वज्रम् । संभृत्य ।

वज्र(ग्म्) संभृत्य संभृत्य वज्रं ँवज्र(ग्म्) संभृत्य ।

8) 2.6.2.5(6)- संभृत्य । भ्रातृव्याय ।

संभृत्य भ्रातृव्याय भ्रातृव्याय संभृत्य संभृत्य भ्रातृव्याय ।

9) 2.6.2.5(6)- संभृत्य ।

संभृत्येति सं - भृत्य ।

10) 2.6.2.5(7)- भ्रातृव्याय । प्र ।

भ्रातृव्याय प्र प्र भ्रातृव्याय भ्रातृव्याय प्र ।

11) 2.6.2.5(8)- प्र । हरति ।

प्र हरति हरति प्र प्र हरति ।

12) 2.6.2.5(9)- हरति । अछंबट्कारम् ।

हर त्यछंबट्कार मछंबट्कार(ग्म्) हरति हर त्यछंबट्कारम् ।

13) 2.6.2.5(10)- अछंबट्कारम् । अपगूर्य ।

अछंबट्कार मपगूर्या पगूर्या छंबट्कार मछंबट्कार मपगूर्य ।

14) 2.6.2.5(10)- अछंबट्कारम् ।

अछंबट्कारमित्यछंबट् - कारम् ।

15) 2.6.2.5(11)- अपगूर्य । वषट् ।

अपगूर्य वषड् वष डपगूर्या पगूर्य वषट् ।

16) 2.6.2.5(11)- अपगूर्य ।

अपगूर्येत्यप - गूर्य ।

17) 2.6.2.5(12)- वषट् । करोति ।

वषट् करोति करोति वषड् वषट् करोति ।

18) 2.6.2.5(13)- करोति । स्तृत्यै ।

करोति स्तृत्यै स्तृत्यै करोति करोति स्तृत्यै ।

19) 2.6.2.5(14)- स्तृत्यै । गायत्री ।

स्तृत्यै गायत्री गायत्री स्तृत्यै स्तृत्यै गायत्री ।

20) 2.6.2.5(15)- गायत्री । पुरोनुवाक्या ।

गायत्री पुरोनुवाक्या पुरोनुवाक्या गायत्री गायत्री पुरोनुवाक्या ।

21) 2.6.2.5(16)- पुरोनुवाक्या । भवति ।

पुरोनुवाक्या भवति भवति पुरोनुवाक्या पुरोनुवाक्या भवति ।

22) 2.6.2.5(16)- पुरोनुवाक्या ।

पुरोनुवाक्येति पुरः - अनुवाक्या ।

23) 2.6.2.5(17)- भवति । त्रिष्टुक् ।

भवति त्रिष्टुक् त्रिष्टुग् भवति भवति त्रिष्टुक् ।

24) 2.6.2.5(18)- त्रिष्टुक् । याज्या ।

त्रिष्टुग् याज्या याज्या त्रिष्टुक् त्रिष्टुग् याज्या ।

25) 2.6.2.5(19)- याज्या । ब्रह्मन्न् ।

याज्या ब्रह्मन् ब्रह्मन्. याज्या याज्या ब्रह्मन्न् ।

26) 2.6.2.5(20)- ब्रह्मन्न् । एव ।

ब्रह्मन् नेवैव ब्रह्मन् ब्रह्मन् नेव ।

27) 2.6.2.5(21)- एव । क्षत्रम् ।

एव क्षत्रम् क्षत्र मेवैव क्षत्रम् ।

28) 2.6.2.5(22)- क्षत्रम् । अन्वारम्भयति ।

क्षत्र मन्वारम्भय त्यन्वारम्भयति क्षत्रम् क्षत्र मन्वारम्भयति ।

29) 2.6.2.5(23)- अन्वारम्भयति । तस्मात् ।

अन्वारम्भयति तस्मात् तस्मा दन्वारम्भय त्यन्वारम्भयति तस्मात् ।

30) 2.6.2.5(23)- अन्वारम्भयति ।

अन्वारम्भयतीत्यनु - आरम्भयति ।

31) 2.6.2.5(24)- तस्मात् । ब्राह्मणः ।

तस्माद् ब्राह्मणो ब्राह्मण स्तस्मात् तस्माद् ब्राह्मणः ।

32) 2.6.2.5(25)- ब्राह्मणः । मुख्यः ।

ब्राह्मणो मुख्यो मुख्यो ब्राह्मणो ब्राह्मणो मुख्यः ।

33) 2.6.2.5(26)- मुख्यः । मुख्यः ।

मुख्यो मुख्यः ।

34) 2.6.2.5(27)- मुख्यः । भवति ।

मुख्यो भवति भवति मुख्यो मुख्यो भवति ।

35) 2.6.2.5(28)- भवति । यः ।

भवति यो यो भवति भवति यः ।

36) 2.6.2.5(29)- यः । एवम् ।

य एव मेवं ँयो य एवम् ।

37) 2.6.2.5(30)- एवम् । वेद ।

एवं ँवेद वेदैव मेवं ँवेद ।

38) 2.6.2.5(31)- वेद । प्र ।

वेद प्र प्र वेद वेद प्र ।

39) 2.6.2.5(32)- प्र । एव ।

प्रैवैव प्र प्रैव ।

40) 2.6.2.5(33)- एव । एनम् ।

एवैन मेन मेवैवैनम् ।

41) 2.6.2.5(34)- एनम् । पुरोनुवाक्यया ।

एनम् पुरोनुवाक्यया पुरोनुवाक्ययैन मेनम् पुरोनुवाक्यया ।

42) 2.6.2.5(35)- पुरोनुवाक्यया । आह ।

पुरोनुवाक्यया ऽऽहाह पुरोनुवाक्यया पुरोनुवाक्यया ऽऽह ।

43) 2.6.2.5(35)- पुरोनुवाक्यया ।

पुरोनुवाक्ययेति पुरः - अनुवाक्यया ।

44) 2.6.2.5(36)- आह । प्र ।

आह प्र प्राहाह प्र ।

45) 2.6.2.5(37)- प्र । नयति ।

प्र णयति नयति प्र प्र णयति ।

46) 2.6.2.5(38)- नयति । याज्यया ।

नयति याज्यया याज्यया नयति नयति याज्यया ।

47) 2.6.2.5(39)- याज्यया । गमयति ।

याज्यया गमयति गमयति याज्यया याज्यया गमयति ।

48) 2.6.2.5(40)- गमयति । वषट्कारेण ।

गमयति वषट्कारेण वषट्कारेण गमयति गमयति वषट्कारेण ।

49) 2.6.2.5(41)- वषट्कारेण । आ ।

वषट्कारेणा वषट्कारेण वषट्कारेणा ।

50) 2.6.2.5(41)- वषट्कारेण ।

वषट्कारेणेति वषट् - कारेण ।

51) 2.6.2.5(42)- आ । एव ।

ऐवैवैव ।

52) 2.6.2.5(43)- एव । एनम् ।

एवैन मेन मेवैवैनम् ।

53) 2.6.2.5(44)- एनम् । पुरोनुवाक्यया ।

एनम् पुरोनुवाक्यया पुरोनुवाक्ययैन मेनम् पुरोनुवाक्यया ।

54) 2.6.2.5(45)- पुरोनुवाक्यया । दत्ते ।

पुरोनुवाक्यया दत्ते दत्ते पुरोनुवाक्यया पुरोनुवाक्यया दत्ते ।

55) 2.6.2.5(45)- पुरोनुवाक्यया ।

पुरोनुवाक्ययेति पुरः - अनुवाक्यया ।

56) 2.6.2.5(46)- दत्ते । प्र ।

दत्ते प्र प्र दत्ते दत्ते प्र ।

57) 2.6.2.5(47)- प्र । यच्छति ।

प्र यच्छति यच्छति प्र प्र यच्छति ।

58) 2.6.2.5(48)- यच्छति । याज्यया ।

यच्छति याज्यया याज्यया यच्छति यच्छति याज्यया ।

59) 2.6.2.5(49)- याज्यया । प्रति ।

याज्यया प्रति प्रति याज्यया याज्यया प्रति ।

60) 2.6.2.5(50)- प्रति । वषट्कारेण ।

प्रति वषट्कारेण वषट्कारेण प्रति प्रति वषट्कारेण ।

1) 2.6.2.6(1)- वषट्कारेण । स्थापयति ।

वषट्कारेण स्थापयति स्थापयति वषट्कारेण वषट्कारेण स्थापयति ।

2) 2.6.2.6(1)- वषट्कारेण ।

वषट्कारेणेति वषट् - कारेण ।

3) 2.6.2.6(2)- स्थापयति । त्रिपदा ।

स्थापयति त्रिपदा त्रिपदा स्थापयति स्थापयति त्रिपदा ।

4) 2.6.2.6(3)- त्रिपदा । पुरोनुवाक्या ।

त्रिपदा पुरोनुवाक्या पुरोनुवाक्या त्रिपदा त्रिपदा पुरोनुवाक्या ।

5) 2.6.2.6(3)- त्रिपदा ।

त्रिपदेति त्रि - पदा ।

6) 2.6.2.6(4)- पुरोनुवाक्या । भवति ।

पुरोनुवाक्या भवति भवति पुरोनुवाक्या पुरोनुवाक्या भवति ।

7) 2.6.2.6(4)- पुरोनुवाक्या ।

पुरोनुवाक्येति पुरः - अनुवाक्या ।

8) 2.6.2.6(5)- भवति । त्रयः ।

भवति त्रयस्त्रयो भवति भवति त्रयः ।

9) 2.6.2.6(6)- त्रयः । इमे ।

त्रय इम इमे त्रय स्त्रय इमे ।

10) 2.6.2.6(7)- इमे । लोकाः ।

इमे लोका लोका इम इमे लोकाः ।

11) 2.6.2.6(8)- लोकाः । एषु ।

लोका एष्वेषु लोका लोका एषु ।

12) 2.6.2.6(9)- एषु । एव । (GS-2.6-4)

एष्वे वैवै ष्वे(ए1)ष्वेव ।

13) 2.6.2.6(10)- एव । लोकेषु । (GS-2.6-4)

एव लोकेषु लोके ष्वेवैव लोकेषु ।

14) 2.6.2.6(11)- लोकेषु । प्रति । (GS-2.6-4)

लोकेषु प्रति प्रति लोकेषु लोकेषु प्रति ।

15) 2.6.2.6(12)- प्रति । तिष्ठति ।

प्रति तिष्ठति तिष्ठति प्रति प्रति तिष्ठति ।

16) 2.6.2.6(13)- तिष्ठति । चतुष्पदा ।

तिष्ठति चतुष्पदा चतुष्पदा तिष्ठति तिष्ठति चतुष्पदा ।

17) 2.6.2.6(14)- चतुष्पदा । याज्या ।

चतुष्पदा याज्या याज्या चतुष्पदा चतुष्पदा याज्या ।

18) 2.6.2.6(14)- चतुष्पदा ।

चतुष्पदेति चतुः - पदा ।

19) 2.6.2.6(15)- याज्या । चतुष्पदः ।

याज्या चतुष्पद श्चतुष्पदो याज्या याज्या चतुष्पदः ।

20) 2.6.2.6(16)- चतुष्पदः । एव ।

चतुष्पद एवैव चतुष्पद श्चतुष्पद एव ।

21) 2.6.2.6(16)- चतुष्पदः ।

चतुष्पद इति चतुः - पदः ।

22) 2.6.2.6(17)- एव । पशून् ।

एव पशून् पशू नेवैव पशून् ।

23) 2.6.2.6(18)- पशून् । अव ।

पशू नवाव पशून् पशू नव ।

24) 2.6.2.6(19)- अव । रुन्धे ।

अव रुन्धे रुन्धे ऽवाव रुन्धे ।

25) 2.6.2.6(20)- रुन्धे । द्व्यक्षरः ।

रुन्धे द्व्यक्षरो द्व्यक्षरो रुन्धे रुन्धे द्व्यक्षरः ।

26) 2.6.2.6(21)- द्व्यक्षरः । वषट्कारः ।

द्व्यक्षरो वषट्कारो वषट्कारो द्व्यक्षरो द्व्यक्षरो वषट्कारः ।

27) 2.6.2.6(21)- द्व्यक्षरः ।

द्व्यक्षर इति द्वि – अक्षरः ।

28) 2.6.2.6(22)- वषट्कारः । द्विपात् ।

वषट्कारो द्विपाद् द्विपाद् वषट्कारो वषट्कारो द्विपात् ।

29) 2.6.2.6(22)- वषट्कारः ।

वषट्कार इति वषट् – कारः ।

30) 2.6.2.6(23)- द्विपात् । यजमानः ।

द्विपाद् यजमानो यजमानो द्विपाद् द्विपाद् यजमानः ।

31) 2.6.2.6(23)- द्विपात् ।

द्विपादिति द्वि – पात् ।

32) 2.6.2.6(24)- यजमानः । पशुषु ।

यजमानः पशुषु पशुषु यजमानो यजमानः पशुषु ।

33) 2.6.2.6(25)- पशुषु । एव ।

पशु ष्वेवैव पशुषु पशु ष्वेव ।

34) 2.6.2.6(26)- एव । उपरिष्टात् ।

एवोपरिष्टा दुपरिष्टा देवै वोपरिष्टात् ।

35) 2.6.2.6(27)- उपरिष्टात् । प्रति ।

उपरिष्टात् प्रति प्रत्युपरिष्टा दुपरिष्टात् प्रति ।

36) 2.6.2.6(28)- प्रति । तिष्ठति ।

प्रति तिष्ठति तिष्ठति प्रति प्रति तिष्ठति ।

37) 2.6.2.6(29)- तिष्ठति । गायत्री ।

तिष्ठति गायत्री गायत्री तिष्ठति तिष्ठति गायत्री ।

38) 2.6.2.6(30)- गायत्री । पुरोनुवाक्या ।

गायत्री पुरोनुवाक्या पुरोनुवाक्या गायत्री गायत्री पुरोनुवाक्या ।

39) 2.6.2.6(31)- पुरोनुवाक्या । भवति ।

पुरोनुवाक्या भवति भवति पुरोनुवाक्या पुरोनुवाक्या भवति ।

40) 2.6.2.6(31)- पुरोनुवाक्या ।

पुरोनुवाक्येति पुरः - अनुवाक्या ।

41) 2.6.2.6(32)- भवति । त्रिष्टुक् ।

भवति त्रिष्टुक् त्रिष्टुग् भवति भवति त्रिष्टुक् ।

42) 2.6.2.6(33)- त्रिष्टुक् । याज्या ।

त्रिष्टुग् याज्या याज्या त्रिष्टुक् त्रिष्टुग् याज्या ।

43) 2.6.2.6(34)- याज्या । एषा ।

याज्यैषैषा याज्या याज्यैषा ।

44) 2.6.2.6(35)- एषा । वै ।

एषा वै वा एषैषा वै ।

45) 2.6.2.6(36)- वै । सप्तपदा ।

वै सप्तपदा सप्तपदा वै वै सप्तपदा ।

46) 2.6.2.6(37)- सप्तपदा । शक्वरी ।

सप्तपदा शक्वरी शक्वरी सप्तपदा सप्तपदा शक्वरी ।

47) 2.6.2.6(37)- सप्तपदा ।

सप्तपदेति सप्त - पदा ।

48) 2.6.2.6(38)- शक्वरी । यत् ।

शक्वरी यद् यच्छक्वरी शक्वरी यत् ।

49) 2.6.2.6(39)- यत् । वै ।

यद् वै वै यद् यद् वै ।

50) 2.6.2.6(40)- वै । एतया ।

वा एत यैतया वै वा एतया ।

51) 2.6.2.6(41)- एतया । देवाः ।

एतया देवा देवा एत यैतया देवाः ।

52) 2.6.2.6(42)- देवाः । अशिक्षन्न् ।

देवा अशिक्षन् नशिक्षन् देवा देवा अशिक्षन्न् ।

53) 2.6.2.6(43)- अशिक्षन्न् । तत् ।

अशिक्षन् तत् तदशिक्षन् नशिक्षन् तत् ।

54) 2.6.2.6(44)- तत् । अशक्नुवन्न् ।

तदशक्नुवन् नशक्नुवन् तत् तदशक्नुवन्न् ।

55) 2.6.2.6(45)- अशक्नुवन्न् । यः ।

अशक्नुवन्. यो यो ऽशक्नुवन् नशक्नुवन्. यः ।

56) 2.6.2.6(46)- यः । एवम् ।

य एव मेवं ँयो य एवम् ।

57) 2.6.2.6(47)- एवम् । वेद ।

एवं ँवेद वेदैव मेवं ँवेद ।

58) 2.6.2.6(48)- वेद । शक्नोति ।

वेद शक्नोति शक्नोति वेद वेद शक्नोति ।

59) 2.6.2.6(49)- शक्नोति । एव ।

शक्नो त्येवैव शक्नोति शक्नो त्येव ।

60) 2.6.2.6(50)- एव । यत् ।

एव यद् यदेवैव यत् ।

61) 2.6.2.6(51)- यत् । शिक्षति ॥

यच्छिक्षति शिक्षति यद् यच्छिक्षति ।

62) 2.6.2.6(52)- शिक्षति ॥

शिक्षतीति शिक्षति ।

=======

## 2.6.3 अनुवाकम् 3 – जटा

1) 2.6.3.1(1)- प्रजापतिः । देवेभ्यः ।

प्रजापतिर् देवेभ्यो देवेभ्यः प्रजापतिः प्रजापतिर् देवेभ्यः ।

2) 2.6.3.1(1)- प्रजापतिः ।

प्रजापतिरिति प्रजा - पतिः ।

3) 2.6.3.1(2)- देवेभ्यः । यज्ञान् ।

देवेभ्यो यज्ञान्. यज्ञान् देवेभ्यो देवेभ्यो यज्ञान् ।

4) 2.6.3.1(3)- यज्ञान् । व्यादिशत् ।

यज्ञान् व्यादिशद् व्यादिशद् यज्ञान्. यज्ञान् व्यादिशत् ।

5) 2.6.3.1(4)- व्यादिशत् । सः ।

व्यादिशथ् स स व्यादिशद् व्यादिशथ् सः ।

6) 2.6.3.1(4)- व्यादिशत् ।

व्यादिशदिति वि - आदिशत् ।

7) 2.6.3.1(5)- सः । आत्मन्न् ।

स आत्मन् नात्मन् थ्स स आत्मन्न् ।

8) 2.6.3.1(6)- आत्मन्न् । आज्यम् ।

आत्मन् नाज्य माज्य मात्मन् नात्मन् नाज्यम् ।

9) 2.6.3.1(7)- आज्यम् । अधत्त ।

आज्य मधत्ता धत्ताज्य माज्य मधत्त ।

10) 2.6.3.1(8)- अधत्त । तम् ।

अधत्त तम् त मधत्ताधत्त तम् ।

11) 2.6.3.1(9)- तम् । दे॒वाः ।

तम् दे॒वा दे॒वा स्तम् तम् दे॒वाः ।

12) 2.6.3.1(10)- दे॒वाः । अ॒ब्रु॒व॒न्न् ।

दे॒वा अ॑ब्रुवन् नब्रुवन् दे॒वा दे॒वा अ॑ब्रुवन्न् ।

13) 2.6.3.1(11)- अ॒ब्रु॒व॒न्न् । ए॒षः ।

अ॒ब्रु॒व॒न् ने॒ष ए॒षो᳚ ऽब्रुवन् नब्रुवन् ने॒षः ।

14) 2.6.3.1(12)- ए॒षः । वाव ।

ए॒ष वाव वावै॒ष ए॒ष वाव ।

15) 2.6.3.1(13)- वाव । य॒ज्ञः ।

वाव य॒ज्ञो य॒ज्ञो वाव वाव य॒ज्ञः ।

16) 2.6.3.1(14)- य॒ज्ञः । यत् ।

य॒ज्ञो यद् यद् य॒ज्ञो य॒ज्ञो यत् ।

17) 2.6.3.1(15)- यत् । आज्य᳚म् ।

यदाज्य॒ माज्यं॒ ँयद् यदाज्य᳚म् ।

18) 2.6.3.1(16)- आज्य᳚म् । अपि॑ ।

आज्य॒ मप्यप्याज्य॒ माज्य॒ मपि॑ ।

19) 2.6.3.1(17)- अपि॑ । ए॒व । (GS-2.6-5)

अप्ये॒वैवा प्यप्ये॒व ।

20) 2.6.3.1(18)- ए॒व । नः॒ । (GS-2.6-5)

ए॒व नो॑ न ए॒वैव नः॑ ।

21) 2.6.3.1(19)- नः । अत्र । (GS-2.6-5)

नो ऽत्रात्र नो नो ऽत्र ।

22) 2.6.3.1(20)- अत्र । अस्तु । (GS-2.6-5)

अत्रा स्त्व स्त्वत्रात्रास्तु ।

23) 2.6.3.1(21)- अस्तु । इति । (GS-2.6-5)

अस्त्विती त्यस्त्व स्त्विति ।

24) 2.6.3.1(22)- इति । सः । (GS-2.6-5)

इति स स इतीति सः ।

25) 2.6.3.1(23)- सः । अब्रवीत् ।

सो ऽब्रवी दब्रवीथ् स सो ऽब्रवीत् ।

26) 2.6.3.1(24)- अब्रवीत् । यजान् ।

अब्रवीद् यजान्. यजा नब्रवी दब्रवीद् यजान् ।

27) 2.6.3.1(25)- यजान् । वः ।

यजान्. वो वो यजान्. यजान्. वः ।

28) 2.6.3.1(26)- वः । आज्यभागौ ।

व आज्यभागा वाज्यभागौ वो व आज्यभागौ ।

29) 2.6.3.1(27)- आज्यभागौ । उप ।

आज्यभागा वुपोपाज्यभागा वाज्यभागा वुप ।

30) 2.6.3.1(27)- आज्यभागौ ।

आज्यभागावित्याज्य - भागौ ।

31) 2.6.3.1(28)- उप । स्तृणान् ।

उप स्तृणान् थ्स्तृणा नुपोप स्तृणान् ।

32) 2.6.3.1(29)- स्तृणान् । अभि ।

स्तृणा नभ्यभि स्तृणान् थ्स्तृणा नभि ।

33) 2.6.3.1(30)- अभि । घारयान् ।

अभि घारयान् घारया नभ्यभि घारयान् ।

34) 2.6.3.1(31)- घारयान् । इति ।

घारया नितीति घारयान् घारया निति ।

35) 2.6.3.1(32)- इति । तस्मात् ।

इति तस्मात् तस्मा दितीति तस्मात् ।

36) 2.6.3.1(33)- तस्मात् । यजन्ति ।

तस्माद् यजन्ति यजन्ति तस्मात् तस्माद् यजन्ति ।

37) 2.6.3.1(34)- यजन्ति । आज्यभागौ ।

यज न्त्याज्यभागा वाज्यभागौ यजन्ति यज न्त्याज्यभागौ ।

38) 2.6.3.1(35)- आज्यभागौ । उप ।

आज्यभागा वुपोपाज्यभागा वाज्यभागा वुप ।

39) 2.6.3.1(35)- आज्यभागौ ।

आज्यभागावित्याज्य - भागौ ।

40) 2.6.3.1(36)- उप । स्तृणन्ति ।

उप स्तृणन्ति स्तृण न्त्युपोप स्तृणन्ति ।

41) 2.6.3.1(37)- स्तृणन्ति । अभि ।

स्तृण न्त्यभ्यभि स्तृणन्ति स्तृण न्त्यभि ।

42) 2.6.3.1(38)- अभि । घारयन्ति ।

अभि घारयन्ति घारय न्त्यभ्यभि घारयन्ति ।

43) 2.6.3.1(39)- घारयन्ति । ब्रह्मवादिनः ।

घारयन्ति ब्रह्मवादिनो ब्रह्मवादिनो घारयन्ति घारयन्ति ब्रह्मवादिनः ।

44) 2.6.3.1(40)- ब्रह्मवादिनः । वदन्ति ।

ब्रह्मवादिनो वदन्ति वदन्ति ब्रह्मवादिनो ब्रह्मवादिनो वदन्ति ।

45) 2.6.3.1(40)- ब्रह्मवादिनः ।

ब्रह्मवादिन इति ब्रह्म - वादिनः ।

46) 2.6.3.1(41)- वदन्ति । कस्मात् ।

वदन्ति कस्मात् कस्माद् वदन्ति वदन्ति कस्मात् ।

47) 2.6.3.1(42)- कस्मात् । सत्यात् ।

कस्माथ् सत्याथ् सत्यात् कस्मात् कस्माथ् सत्यात् ।

48) 2.6.3.1(43)- सत्यात् । यातयामानि ।

सत्याद् यातयामानि यातयामानि सत्याथ् सत्याद् यातयामानि ।

49) 2.6.3.1(44)- यातयामानि । अन्यानि ।

यातयामा न्यन्या न्यन्यानि यातयामानि यातयामा न्यन्यानि ।

50) 2.6.3.1(44)- यातयामानि ।

यातयामानीति यात - यामानि ।

51) 2.6.3.1(45)- अन्यानि । हवी(ग्म्)षि ।

अन्यानि हवी(ग्म्)षि हवी(ग्ग्) ष्यन्या न्यन्यानि हवी(ग्म्)षि ।

52) 2.6.3.1(46)- हवी(ग्म्)षि । अयातयामम् ।

हवी(ग्ग्) ष्ययातयाम मयातयाम(ग्म्) हवी(ग्म्)षि हवी(ग्ग्) ष्ययातयामम् ।

53) 2.6.3.1(47)- अयातयामम् । आज्यम् ।

अयातयाम माज्य माज्य मयातयाम मयातयाम माज्यम् ।

54) 2.6.3.1(47)- अयातयामम् ।

अयातयाममित्ययात - यामम् ।

55) 2.6.3.1(48)- आज्यम् । इति ।

आज्य मिती त्याज्य माज्य मिति ।

56) 2.6.3.1(49)- इति । प्राजापत्यम् ।

इति प्राजापत्यम् प्राजापत्य मितीति प्राजापत्यम् ।

57) 2.6.3.1(50)- प्राजापत्यम् । इति ।

प्राजापत्य मितीति प्राजापत्यम् प्राजापत्य मिति ।

58) 2.6.3.1(50)- प्राजापत्यम् ।

प्राजापत्यमिति प्राजा - पत्यम् ।

1) 2.6.3.2(1)- इति । ब्रूयात् ।

इति ब्रूयाद् ब्रूया दितीति ब्रूयात् ।

2) 2.6.3.2(2)- ब्रूयात् । अयातयामा ।

ब्रूया दयातयामा ऽयातयामा ब्रूयाद् ब्रूया दयातयामा ।

3) 2.6.3.2(3)- अयातयामा । हि ।

अयातयामा हि ह्ययातयामा ऽयातयामा हि ।

4) 2.6.3.2(3)- अयातयामा ।

अयातयामेत्ययात – यामा ।

5) 2.6.3.2(4)- हि । देवानाम् ।

हि देवानाम् देवाना(ग्म्) हि हि देवानाम् ।

6) 2.6.3.2(5)- देवानाम् । प्रजापतिः ।

देवानाम् प्रजापतिः प्रजापतिर् देवानाम् देवानाम् प्रजापतिः ।

7) 2.6.3.2(6)- प्रजापतिः । इति ।

प्रजापति रितीति प्रजापतिः प्रजापति रिति ।

8) 2.6.3.2(6)- प्रजापतिः ।

प्रजापतिरिति प्रजा – पतिः ।

9) 2.6.3.2(7)- इति । छन्दा(ग्म्)सि ।

इति छन्दा(ग्म्)सि छन्दा(ग्म्)सीतीति छन्दा(ग्म्)सि ।

10) 2.6.3.2(8)- छन्दा(ग्म्)सि । देवेभ्यः ।

छन्दा(ग्म्)सि देवेभ्यो देवेभ्य श्छन्दा(ग्म्)सि छन्दा(ग्म्)सि देवेभ्यः ।

11) 2.6.3.2(9)- देवेभ्यः । अप ।

देवेभ्यो ऽपाप देवेभ्यो देवेभ्यो ऽप ।

12) 2.6.3.2(10)- अप । अक्रामन्न् ।

अपाक्रामन् नक्रामन् नपापा क्रामन्न् ।

13) 2.6.3.2(11)- अक्रामन्न् । न ।

अक्रामन् न नाक्रामन् नक्रामन् न ।

14) 2.6.3.2(12)- न । वः ।

न वो वो न न वः ।

15) 2.6.3.2(13)- वः । अभागानि ।

वो ऽभागा न्यभागानि वो वो ऽभागानि ।

16) 2.6.3.2(14)- अभागानि । हव्यम् ।

अभागानि हव्य(ग्म्) हव्य मभागा न्यभागानि हव्यम् ।

17) 2.6.3.2(15)- हव्यम् । वक्ष्यामः ।

हव्यं ँवक्ष्यामो वक्ष्यामो हव्य(ग्म्) हव्यं ँवक्ष्यामः ।

18) 2.6.3.2(16)- वक्ष्यामः । इति ।

वक्ष्याम इतीति वक्ष्यामो वक्ष्याम इति ।

19) 2.6.3.2(17)- इति । तेभ्यः ।

इति तेभ्य स्तेभ्य इतीति तेभ्यः ।

20) 2.6.3.2(18)- तेभ्यः । एतत् ।

तेभ्य एत देतत् तेभ्य स्तेभ्य एतत् ।

21) 2.6.3.2(19)- एतत् । चतुरवत्तम् ।

एतच् चतुरवत्तम् चतुरवत्त मेतदेतच् चतुरवत्तम् ।

22) 2.6.3.2(20)- चतुरवत्तम् । अधारयन्न् ।

चतुरवत्त मधारयन् नधारय(ग्ग्) श्चतुरवत्तम् चतुरवत्त मधारयन्न् ।

23) 2.6.3.2(20)- चतुरवत्तम् ।

चतुरवत्तमिति चतुः - अवत्तम् ।

24) 2.6.3.2(21)- अधारयन्न् । पुरोनुवाक्यायै ।

अधारयन् पुरोनुवाक्यायै पुरोनुवाक्याया अधारयन् नधारयन् पुरोनुवाक्यायै ।

25) 2.6.3.2(22)- पुरोनुवाक्यायै । याज्यायै ।

पुरोनुवाक्यायै याज्यायै याज्यायै पुरोनुवाक्यायै पुरोनुवाक्यायै याज्यायै ।

26) 2.6.3.2(22)- पुरोनुवाक्यायै ।

पुरोनुवाक्याया इति पुरः - अनुवाक्यायै ।

27) 2.6.3.2(23)- याज्यायै । देवतायै ।

याज्यायै देवतायै देवतायै याज्यायै याज्यायै देवतायै ।

28) 2.6.3.2(24)- देवतायै । वषट्काराय ।

देवतायै वषट्काराय वषट्काराय देवतायै देवतायै वषट्काराय ।

29) 2.6.3.2(25)- वषट्काराय । यत् ।

वषट्काराय यद् यद् वषट्काराय वषट्काराय यत् ।

30) 2.6.3.2(25)- वषट्काराय ।

वषट्कारायेति वषट् - काराय ।

31) 2.6.3.2(26)- यत् । चतुरवत्तम् ।

यच् चतुरवत्तम् चतुरवत्तँ यद् यच् चतुरवत्तम् ।

32) 2.6.3.2(27)- चतुरवत्तम् । जुहोति ।

चतुरवत्तम् जुहोति जुहोति चतुरवत्तम् चतुरवत्तम् जुहोति ।

33) 2.6.3.2(27)- चतुरवत्तम् ।

चतुरवत्तमिति चतुः - अवत्तम् ।

34) 2.6.3.2(28)- जुहोति । छन्दा(ग्म्)सि ।

जुहोति छन्दा(ग्म्)सि छन्दा(ग्म्)सि जुहोति जुहोति छन्दा(ग्म्)सि ।

35) 2.6.3.2(29)- छन्दा(ग्म्)सि । एव ।

छन्दा(गग्)ं स्येवैव छन्दा(ग्म्)सि छन्दा(गग्)ं स्येव ।

36) 2.6.3.2(30)- एव । तत् ।

एव तत् तदेवैव तत् ।

37) 2.6.3.2(31)- तत् । प्रीणाति ।

तत् प्रीणाति प्रीणाति तत् तत् प्रीणाति ।

38) 2.6.3.2(32)- प्रीणाति । तानि ।

प्रीणाति तानि तानि प्रीणाति प्रीणाति तानि ।

39) 2.6.3.2(33)- तानि । अस्य ।

तान्यस्यास्य तानि तान्यस्य ।

40) 2.6.3.2(34)- अस्य । प्रीतानि ।

अस्य प्रीतानि प्रीता न्यस्यास्य प्रीतानि ।

41) 2.6.3.2(35)- प्रीतानि । देवेभ्यः ।

प्रीतानि देवेभ्यो देवेभ्यः प्रीतानि प्रीतानि देवेभ्यः ।

42) 2.6.3.2(36)- देवेभ्यः । हव्यम् ।

देवेभ्यो हव्य(ग्म्) हव्यम् देवेभ्यो देवेभ्यो हव्यम् ।

43) 2.6.3.2(37)- हव्यम् । वहन्ति ।

हव्यं ँवहन्ति वहन्ति हव्य(ग्म्) हव्यं ँवहन्ति ।

44) 2.6.3.2(38)- वहन्ति । अङ्गिरसः ।

वह न्त्यङ्गिरसो ऽङ्गिरसो वहन्ति वह न्त्यङ्गिरसः ।

45) 2.6.3.2(39)- अङ्गिरसः । वै ।

अङ्गिरसो वै वा अङ्गिरसो ऽङ्गिरसो वै ।

46) 2.6.3.2(40)- वै । इतः ।

वा इत इतो वै वा इतः ।

47) 2.6.3.2(41)- इतः । उत्तमाः ।

इत उत्तमा उत्तमा इत इत उत्तमाः ।

48) 2.6.3.2(42)- उत्तमाः । सुवर्गम् ।

उत्तमाः सुवर्ग(ग्म्) सुवर्ग मुत्तमा उत्तमाः सुवर्गम् ।

49) 2.6.3.2(42)- उत्तमाः ।

उत्तमा इत्युत् – तमाः ।

50) 2.6.3.2(43)- सुवर्गम् । लोकम् ।

सुवर्गम् ँलोकम् ँलोक(ग्म्) सुवर्ग(ग्म्) सुवर्गम् ँलोकम् ।

51) 2.6.3.2(43)- सुवर्गम् ।

सुवर्गमिति सुवः – गम् ।

52) 2.6.3.2(44)- लोकम् । आयन्न् ।

लोक मायन् नायन् ँलोकम् ँलोक मायन्न् ।

53) 2.6.3.2(45)- आयन्न् । तत् ।

आयन् तत् तदायन् नायन् तत् ।

54) 2.6.3.2(46)- तत् । ऋषयः ।

तदृषय ऋषय स्तत् तदृषयः ।

55) 2.6.3.2(47)- ऋषयः । यज्ञवास्तु ।

ऋषयो यज्ञवास्तु यज्ञवा स्त्वृषय ऋषयो यज्ञवास्तु ।

56) 2.6.3.2(48)- यज्ञवास्तु । अभ्यवायन्न् ।

यज्ञवा स्त्वभ्यवायन् नभ्यवायन्. यज्ञवास्तु यज्ञवा स्त्वभ्यवायन्न् ।

57) 2.6.3.2(48)- यज्ञवास्तु ।

यज्ञवास्त्विति यज्ञ - वास्तु ।

58) 2.6.3.2(49)- अभ्यवायन्न् । ते ।

अभ्यवायन् ते ते ऽभ्यवायन् नभ्यवायन् ते ।

59) 2.6.3.2(49)- अभ्यवायन्न् ।

अभ्यवायन्नित्यभि - अवायन्न् ।

60) 2.6.3.2(50)- ते । अपश्यन्न् ।

ते ऽपश्यन् नपश्यन् ते ते ऽपश्यन्न् ।

1) 2.6.3.3(1)- अपश्यन्न् । पुरोडाशम् ।

अपश्यन् पुरोडाशम् पुरोडाश मपश्यन् नपश्यन् पुरोडाशम् ।

2) 2.6.3.3(2)- पुरोडाशम् । कूर्मम् ।

पुरोडाशम् कूर्मम् कूर्मम् पुरोडाशम् पुरोडाशम् कूर्मम् ।

3) 2.6.3.3(3)- कूर्मम् । भूतम् ।

कूर्मम् भूतम् भूतम् कूर्मम् कूर्मम् भूतम् ।

4) 2.6.3.3(4)- भूतम् । सर्पन्तम् ।

भूत(ग्म्) सर्पन्त(ग्म्) सर्पन्तम् भूतम् भूत(ग्म्) सर्पन्तम् ।

5) 2.6.3.3(5)- सर्पन्तम् । तम् ।

सर्पन्तम् तम् त(ग्म्) सर्पन्त(ग्म्) सर्पन्तम् तम् ।

6) 2.6.3.3(6)- तम् । अब्रुवन्न् ।

त मब्रुवन् नब्रुवन् तम् त मब्रुवन्न् ।

7) 2.6.3.3(7)- अब्रुवन्न् । इन्द्राय ।

अब्रुवन् निन्द्रा येन्द्रायाब्रुवन् नब्रुवन् निन्द्राय ।

8) 2.6.3.3(8)- इन्द्राय । ध्रियस्व ।

इन्द्राय ध्रियस्व ध्रिय स्वेन्द्रा येन्द्राय ध्रियस्व ।

9) 2.6.3.3(9)- ध्रियस्व । बृहस्पतये ।

ध्रियस्व बृहस्पतये बृहस्पतये ध्रियस्व ध्रियस्व बृहस्पतये ।

10) 2.6.3.3(10)- बृहस्पतये । ध्रियस्व ।

बृहस्पतये ध्रियस्व ध्रियस्व बृहस्पतये बृहस्पतये ध्रियस्व ।

11) 2.6.3.3(11)- ध्रियस्व । विश्वेभ्यः ।

ध्रियस्व विश्वेभ्यो विश्वेभ्यो ध्रियस्व ध्रियस्व विश्वेभ्यः ।

12) 2.6.3.3(12)- विश्वेभ्यः । देवेभ्यः ।

विश्वेभ्यो देवेभ्यो देवेभ्यो विश्वेभ्यो विश्वेभ्यो देवेभ्यः ।

13) 2.6.3.3(13)- दे॒वेभ्यः॑ । ध्रि॒य॒स्व॒ ।

दे॒वेभ्यो॑ ध्रियस्व ध्रियस्व दे॒वेभ्यो॑ दे॒वेभ्यो॑ ध्रियस्व ।

14) 2.6.3.3(14)- ध्रि॒य॒स्व॒ । इति॑ ।

ध्रि॒य॒स्वे तीति॑ ध्रियस्व ध्रिय॒स्वेति॑ ।

15) 2.6.3.3(15)- इति॑ । सः ।

इति॒ स स इतीति॒ सः ।

16) 2.6.3.3(16)- सः । न ।

स न न स स न ।

17) 2.6.3.3(17)- न । अ॒द्ध्रि॒य॒त॒ ।

नाद्ध्रि॑यता द्ध्रियत॒ न नाद्ध्रि॑यत ।

18) 2.6.3.3(18)- अ॒द्ध्रि॒य॒त॒ । तम् ।

अ॒द्ध्रि॒य॒त॒ तम् त मद्ध्रि॑यता द्ध्रियत॒ तम् ।

19) 2.6.3.3(19)- तम् । अ॒ब्रु॒व॒न्न् ।

त म॑ब्रुवन् नब्रु॒वन् तम् त म॑ब्रुवन्न् ।

20) 2.6.3.3(20)- अ॒ब्रु॒व॒न्न् । अ॒ग्नये॑ ।

अ॒ब्रु॒व॒न् न॒ग्नय॒ ऽग्नये॑ ऽब्रुवन् नब्रुवन् न॒ग्नये॑ ।

21) 2.6.3.3(21)- अ॒ग्नये॑ । ध्रि॒य॒स्व॒ ।

अ॒ग्नये॑ ध्रियस्व ध्रियस्वा॒ग्नय॒ ऽग्नये॑ ध्रियस्व ।

22) 2.6.3.3(22)- ध्रि॒य॒स्व॒ । इति॑ ।

ध्रि॒य॒स्वे तीति॑ ध्रियस्व ध्रिय॒स्वेति॑ ।

23) 2.6.3.3(23)- इति । सः ।

इति स स इतीति सः ।

24) 2.6.3.3(24)- सः । अग्नये ।

सो ऽग्नये ऽग्नये स सो ऽग्नये ।

25) 2.6.3.3(25)- अग्नये । अद्ध्रियत ।

अग्नये ऽद्ध्रियता द्ध्रियता ग्नये ऽग्नये ऽद्ध्रियत ।

26) 2.6.3.3(26)- अद्ध्रियत । यत् ।

अद्ध्रियत यद् यदद्ध्रियता द्ध्रियत यत् ।

27) 2.6.3.3(27)- यत् । आग्नेयः ।

यदाग्नेय आग्नेयो यद् यदाग्नेयः ।

28) 2.6.3.3(28)- आग्नेयः । अष्टाकपालः ।

आग्नेयो ऽष्टाकपालो ऽष्टाकपाल आग्नेय आग्नेयो ऽष्टाकपालः ।

29) 2.6.3.3(29)- अष्टाकपालः । अमावास्यायाम् ।

अष्टाकपालो ऽमावास्याया ममावास्याया मष्टाकपालो ऽष्टाकपालो ऽमावास्यायाम् ।

30) 2.6.3.3(29)- अष्टाकपालः ।

अष्टाकपाल इत्यष्टा – कपालः ।

31) 2.6.3.3(30)- अमावास्यायाम् । च ।

अमावास्यायाम् च चामावास्याया ममावास्यायाम् च ।

32) 2.6.3.3(30)- अमावास्यायाम् ।

अमावास्यायामित्यमा – वास्यायाम् ।

33) 2.6.3.3(31)- च । पौर्णमास्याम् ।

च पौर्णमास्याम् पौर्णमास्याम् च च पौर्णमास्याम् ।

34) 2.6.3.3(32)- पौर्णमास्याम् । च । (GS-2.6-7)

पौर्णमास्याम् च च पौर्णमास्याम् पौर्णमास्याम् च ।

35) 2.6.3.3(32)- पौर्णमास्याम् । (GS-2.6-7)

पौर्णमास्यामिति पौर्ण - मास्याम् ।

36) 2.6.3.3(33)- च । अच्युतः । (GS-2.6-7)

चाच्युतो अच्युतश्च चाच्युतः ।

37) 2.6.3.3(34)- अच्युतः । भवति । (PS-11.17,GS-2.6-7)

अच्युतो भवति भव त्यच्युतो अच्युतो भवति ।

38) 2.6.3.3(35)- भवति । सुवर्गस्य । (GS-2.6-7)

भवति सुवर्गस्य सुवर्गस्य भवति भवति सुवर्गस्य ।

39) 2.6.3.3(36)- सुवर्गस्य । लोकस्य ।

सुवर्गस्य लोकस्य लोकस्य सुवर्गस्य सुवर्गस्य लोकस्य ।

40) 2.6.3.3(36)- सुवर्गस्य ।

सुवर्गस्येति सुवः - गस्य ।

41) 2.6.3.3(37)- लोकस्य । अभिजित्यै ।

लोकस्या भिजित्या अभिजित्यै लोकस्य लोकस्या भिजित्यै ।

42) 2.6.3.3(38)- अभिजित्यै । तम् ।

अभिजित्यै तम् त मभिजित्या अभिजित्यै तम् ।

43) 2.6.3.3(38)- अभिजित्यै ।

अभिजित्या इत्यभि - जित्यै ।

44) 2.6.3.3(39)- तम् । अब्रुवन्न् ।

त मब्रुवन् नब्रुवन् तम् त मब्रुवन्न् ।

45) 2.6.3.3(40)- अब्रुवन्न् । कथा ।

अब्रुवन् कथा कथा ऽब्रुवन् नब्रुवन् कथा ।

46) 2.6.3.3(41)- कथा । अहास्थाः ।

कथा ऽहास्था अहास्थाः कथा कथा ऽहास्थाः ।

47) 2.6.3.3(42)- अहास्थाः । इति ।

अहास्था इती त्यहास्था अहास्था इति ।

48) 2.6.3.3(43)- इति । अनुपाक्तः ।

इत्यनुपाक्तो ऽनुपाक्त इतीत्यनुपाक्तः ।

49) 2.6.3.3(44)- अनुपाक्तः । अभूवम् ।

अनुपाक्तो ऽभूव मभूव मनुपाक्तो ऽनुपाक्तो ऽभूवम् ।

50) 2.6.3.3(44)- अनुपाक्तः ।

अनुपाक्त इत्यनुप - अक्तः ।

51) 2.6.3.3(45)- अभूवम् । इति ।

अभूव मिती त्यभूव मभूव मिति ।

52) 2.6.3.3(46)- इति । अब्रवीत् ।

इत्यब्रवी दब्रवी दिती त्यब्रवीत् ।

53) 2.6.3.3(47)- अब्रवीत् । यथा ।

अब्रवीद् यथा यथा ऽब्रवी दब्रवीद् यथा ।

54) 2.6.3.3(48)- यथा । अक्षः । (GS-2.6-6)

यथा ऽक्षो ऽक्षो यथा यथा ऽक्षः ।

55) 2.6.3.3(49)- अक्षः । अनुपाक्तः । (GS-2.6-6)

अक्षो ऽनुपाक्तो ऽनुपाक्तो ऽक्षो ऽक्षो ऽनुपाक्तः ।

56) 2.6.3.3(50)- अनुपाक्तः । अवाच्छ्र्छति । (GS-2.6-6)

अनुपाक्तो ऽवाच्छ्र्छ त्यवाच्छ्र्छ त्यनुपाक्तो ऽनुपाक्तो ऽवाच्छ्र्छति ।

57) 2.6.3.3(50)- अनुपाक्तः । (GS-2.6-6)

अनुपाक्त इत्यनुप - अक्तः ।

1) 2.6.3.4(1)- अवाच्छ्र्छति । एवम् । (GS-2.6-6)

अवाच्छ्र्छ त्येव मेव मवाच्छ्र्छ त्यवाच्छ्र्छ त्येवम् ।

2) 2.6.3.4(1)- अवाच्छ्र्छति । (GS-2.6-6)

अवाच्छ्र्छतीत्यव - ऋच्छति ।

3) 2.6.3.4(2)- एवम् । अव । (GS-2.6-6)

एव मवावैव मेव मव ।

4) 2.6.3.4(3)- अव । आरम् । (GS-2.6-6)

अवार मार मवावारम् ।

5) 2.6.3.4(4)- आरम् । इति । (GS-2.6-6)

आर मिती त्यार मार मिति ।

6) 2.6.3.4(5)- इति । उपरिष्टात् । (GS-2.6-6)

इत्युपरिष्टा दुपरिष्टा दिती त्युपरिष्टात् ।

7) 2.6.3.4(6)- उपरिष्टात् । अभ्यज्य । (GS-2.6-6)

उपरिष्टा दभ्यज्या भ्यज्योपरिष्टा दुपरिष्टा दभ्यज्य ।

8) 2.6.3.4(7)- अभ्यज्य । अधस्तात् । (GS-2.6-6)

अभ्यज्या धस्ता दधस्ता दभ्यज्या भ्यज्या धस्तात् ।

9) 2.6.3.4(7)- अभ्यज्य । (GS-2.6-6)

अभ्यज्येत्यभि - अज्य ।

10) 2.6.3.4(8)- अधस्तात् । उप ।

अधस्ता दुपोपाधस्ता दधस्तादुप ।

11) 2.6.3.4(9)- उप । अनक्ति ।

उपानक्त्यन क्त्युपोपानक्ति ।

12) 2.6.3.4(10)- अनक्ति । सुवर्गस्य ।

अनक्ति सुवर्गस्य सुवर्गस्या नक्त्यनक्ति सुवर्गस्य ।

13) 2.6.3.4(11)- सुवर्गस्य । लोकस्य ।

सुवर्गस्य लोकस्य लोकस्य सुवर्गस्य सुवर्गस्य लोकस्य ।

14) 2.6.3.4(11)- सुवर्गस्य ।

सुवर्गस्येति सुवः - गस्य ।

15) 2.6.3.4(12)- लोकस्य । समष्ट्यै ।

लोकस्य समष्ट्यै समष्ट्यै लोकस्य लोकस्य समष्ट्यै ।

16) 2.6.3.4(13)- समष्ट्यै । सर्वाणि ।

समष्ट्यै सर्वाणि सर्वाणि समष्ट्यै समष्ट्यै सर्वाणि ।

17) 2.6.3.4(13)- समष्ट्यै ।

समष्ट्या इति सं - अष्ट्यै ।

18) 2.6.3.4(14)- सर्वाणि । कपालानि ।

सर्वाणि कपालानि कपालानि सर्वाणि सर्वाणि कपालानि ।

19) 2.6.3.4(15)- कपालानि । अभि ।

कपाला न्यभ्यभि कपालानि कपाला न्यभि ।

20) 2.6.3.4(16)- अभि । प्रथयति ।

अभि प्रथयति प्रथय त्यभ्यभि प्रथयति ।

21) 2.6.3.4(17)- प्रथयति । तावतः ।

प्रथयति तावत स्तावतः प्रथयति प्रथयति तावतः ।

22) 2.6.3.4(18)- तावतः । पुरोडाशान् ।

तावतः पुरोडाशान् पुरोडाशान् तावत स्तावतः पुरोडाशान् ।

23) 2.6.3.4(19)- पुरोडाशान् । अमुष्मिन्न् ।

पुरोडाशा नमुष्मिन् नमुष्मिन् पुरोडाशान् पुरोडाशा नमुष्मिन्न् ।

24) 2.6.3.4(20)- अमुष्मिन्न् । लोके । (GS-2.6-8)

अमुष्मिन् ँल्लोके लोके ऽमुष्मिन् नमुष्मिन् ँल्लोके ।

25) 2.6.3.4(21)- लोके । अभि । (GS-2.6-8)

लोके(ए1) ऽभ्यभि लोके लोके ऽभि ।

26) 2.6.3.4(22)- अभि । जयति । (GS-2.6-8)

अभि जयति जय त्यभ्यभि जयति ।

27) 2.6.3.4(23)- जयति । यः । (GS-2.6-8)

जयति यो यो जयति जयति यः ।

28) 2.6.3.4(24)- यः । विदग्धः ।

यो विदग्धो विदग्धो यो यो विदग्धः ।

29) 2.6.3.4(25)- विदग्धः । सः ।

विदग्धः स स विदग्धो विदग्धः सः ।

30) 2.6.3.4(25)- विदग्धः ।

विदग्ध इति वि - दग्धः ।

31) 2.6.3.4(26)- सः । नैर्.ऋतः ।

स नैर्.ऋतो नैर्.ऋतः स स नैर्.ऋतः ।

32) 2.6.3.4(27)- नैर्.ऋतः । यः ।

नैर्.ऋतो यो यो नैर्.ऋतो नैर्.ऋतो यः ।

33) 2.6.3.4(27)- नैर्.ऋतः ।

नैर्.ऋत इति नैः - ऋतः ।

34) 2.6.3.4(28)- यः । अशृतः ।

यो ऽशृतो ऽशृतो यो यो ऽशृतः ।

35) 2.6.3.4(29)- अशृतः । सः ।

अशृतः स सो ऽशृतो ऽशृतः सः ।

36) 2.6.3.4(30)- सः । रौद्रः ।

स रौद्रो रौद्रः स स रौद्रः ।

37) 2.6.3.4(31)- रौद्रः । यः ।

रौद्रो यो यो रौद्रो रौद्रो यः ।

38) 2.6.3.4(32)- यः । शृतः ।

यः शृतः शृतो यो यः शृतः ।

39) 2.6.3.4(33)- शृतः । सः ।

शृतः स स शृतः शृतः सः ।

40) 2.6.3.4(34)- सः । सदेवः ।

स सदेवः सदेवः स स सदेवः ।

41) 2.6.3.4(35)- सदेवः । तस्मात् ।

सदेव स्तस्मात् तस्माथ् सदेवः सदेव स्तस्मात् ।

42) 2.6.3.4(35)- सदेवः ।

सदेव इति स - देवः ।

43) 2.6.3.4(36)- तस्मात् । अविदहता ।

तस्मा दविदहता ऽविदहता तस्मात् तस्मा दविदहता ।

44) 2.6.3.4(37)- अविदहता । शृतङ्कृत्यः ।

अविदहता शृतङ्कृत्यः शृतङ्कृत्यो ऽविदहता ऽविदहता शृतङ्कृत्यः ।

45) 2.6.3.4(37)- अविदहता ।

अविदहतेत्यवि - दहता ।

46) 2.6.3.4(38)- शृतङ्कृत्यः । सदेवत्वाय ।

शृतङ्कृत्यः सदेवत्वाय सदेवत्वाय शृतङ्कृत्यः शृतङ्कृत्यः सदेवत्वाय ।

47) 2.6.3.4(38)- शृतङ्कृत्यः ।

शृतङ्कृत्य इति शृतं - कृत्यः ।

48) 2.6.3.4(39)- सदेवत्वाय । भस्मना ।

सदेवत्वाय भस्मना भस्मना सदेवत्वाय सदेवत्वाय भस्मना ।

49) 2.6.3.4(39)- सदेवत्वाय ।

सदेवत्वायेति सदेव - त्वाय ।

50) 2.6.3.4(40)- भस्मना । अभि ।

भस्मना ऽभ्यभि भस्मना भस्मना ऽभि ।

51) 2.6.3.4(41)- अभि । वासयति ।

अभि वासयति वासय त्यभ्यभि वासयति ।

52) 2.6.3.4(42)- वासयति । तस्मात् ।

वासयति तस्मात् तस्माद् वासयति वासयति तस्मात् ।

53) 2.6.3.4(43)- तस्मात् । मा(ग्म्)सेन ।

तस्मान् मा(ग्म्)सेन मा(ग्म्)सेन तस्मात् तस्मान् मा(ग्म्)सेन ।

54) 2.6.3.4(44)- मा(ग्म्)सेन । अस्थि ।

मा(ग्म्)सेना स्थ्यस्थि मा(ग्म्)सेन मा(ग्म्)सेना स्थि ।

55) 2.6.3.4(45)- अस्थि । छन्नम् ।

अस्थि छन्नम् छन्न मस्थ्यस्थि छन्नम् ।

56) 2.6.3.4(46)- छन्नम् । वेदेन ।

छन्नं ँवेदेन वेदेन छन्नम् छन्नं ँवेदेन ।

57) 2.6.3.4(47)- वेदेन । अभि ।

वेदेना भ्यभि वेदेन वेदेनाभि ।

58) 2.6.3.4(48)- अभि । वासयति ।

अभि वासयति वासय त्यभ्यभि वासयति ।

59) 2.6.3.4(49)- वासयति । तस्मात् ।

वासयति तस्मात् तस्माद् वासयति वासयति तस्मात् ।

60) 2.6.3.4(50)- तस्मात् । केशैः ।

तस्मात् केशैः केशै स्तस्मात् तस्मात् केशैः ।

1) 2.6.3.5(1)- केशैः । शिरः ।

केशैः शिरः शिरः केशैः केशैः शिरः ।

2) 2.6.3.5(2)- शिरः । छन्नम् ।

शिर श्छन्नम् छन्न(ग्म्) शिरः शिर श्छन्नम् ।

3) 2.6.3.5(3)- छन्नम् । प्रच्युतम् ।

छन्नम् प्रच्युतम् प्रच्युतम् छन्नम् छन्नम् प्रच्युतम् ।

4) 2.6.3.5(4)- प्रच्युतम् । वै ।

प्रच्युतं ँवै वै प्रच्युतम् प्रच्युतं ँवै ।

5) 2.6.3.5(4)- प्रच्युतम् ।

प्रच्युतमिति प्र - च्युतम् ।

6) 2.6.3.5(5)- वै । एतत् ।

वा एत देतद् वै वा एतत् ।

7) 2.6.3.5(6)- एतत् । अस्मात् ।

एतदस्मा दस्मा देत देत दस्मात् ।

8) 2.6.3.5(7)- अस्मात् । लोकात् ।

अस्मा ल्लोका ल्लोका दस्मा दस्मा ल्लोकात् ।

9) 2.6.3.5(8)- लोकात् । अगतम् ।

लोका दगत मगतम् ँलोका ल्लोका दगतम् ।

10) 2.6.3.5(9)- अगतम् । देवलोकम् ।

अगतम् देवलोकम् देवलोक मगत मगतम् देवलोकम् ।

11) 2.6.3.5(10)- देवलोकम् । यत् ।

देवलोकं ँयद् यद् देवलोकम् देवलोकं ँयत् ।

12) 2.6.3.5(10)- देवलोकम् ।

देवलोकमिति देव - लोकम् ।

13) 2.6.3.5(11)- यत् । शृतम् ।

यच् छृत(ग्म्) शृतं ँयद् यच्छृतम् ।

14) 2.6.3.5(12)- शृतम् । हविः ।

शृत(ग्म्) हविर्. हविः शृत(ग्म्) शृत(ग्म्) हविः ।

15) 2.6.3.5(13)- हविः । अनभिघारितम् ।

हवि रनभिघारित मनभिघारित(ग्म्) हविर्. हवि रनभिघारितम् ।

16) 2.6.3.5(14)- अनभिघारितम् । अभिघार्य ।

अनभिघारित मभिघार्या भिघार्या नभिघारित मनभिघारित मभिघार्य ।

17) 2.6.3.5(14)- अनभिघारितम् ।

अनभिघारितमित्यनभि - घारितम् ।

18) 2.6.3.5(15)- अभिघार्य । उत् ।

अभिघार्यो दुदभिघार्या भिघार्योत् ।

19) 2.6.3.5(15)- अभिघार्य ।

अभिघार्येत्यभि - घार्य ।

20) 2.6.3.5(16)- उत् । वासयति ।

उद् वासयति वासय त्युदुद् वासयति ।

21) 2.6.3.5(17)- वासयति । देवत्रा ।

वासयति देवत्रा देवत्रा वासयति वासयति देवत्रा ।

22) 2.6.3.5(18)- देवत्रा । एव ।

देव त्रैवैव देवत्रा देव त्रैव ।

23) 2.6.3.5(18)- देवत्रा ।

देवत्रेति देव - त्रा ।

24) 2.6.3.5(19)- एव । एनत् ।

एवैन देन देवैवैनत् ।

25) 2.6.3.5(20)- एनत् । गमयति ।

एनद् गमयति गमय त्येन देनद् गमयति ।

26) 2.6.3.5(21)- गमयति । यदि ।

गमयति यदि यदि गमयति गमयति यदि ।

27) 2.6.3.5(22)- यदि । एकम् ।

यद्येक मेकं ँयदि यद्येकम् ।

28) 2.6.3.5(23)- एकम् । कपालम् ।

एकम् कपालम् कपाल मेक मेकम् कपालम् ।

29) 2.6.3.5(24)- कपालम् । नश्येत् ।

कपालम् नश्येन् नश्येत् कपालम् कपालम् नश्येत् ।

30) 2.6.3.5(25)- नश्येत् । एकः ।

नश्ये देक एको नश्येन् नश्ये देकः ।

31) 2.6.3.5(26)- एकः । मासः ।

एको मासो मास एक एको मासः ।

32) 2.6.3.5(27)- मासः । सँवथ्सरस्य ।

मासः सँवथ्सरस्य सँवथ्सरस्य मासो मासः सँवथ्सरस्य ।

33) 2.6.3.5(28)- सँवथ्सरस्य । अनवेतः ।

सँवथ्सरस्या नवेतो ऽनवेतः सँवथ्सरस्य सँवथ्सरस्या नवेतः ।

34) 2.6.3.5(28)- सँवथ्सरस्य ।

सँवथ्सरस्येति सं - वथ्सरस्य ।

35) 2.6.3.5(29)- अनवेतः । स्यात् ।

अनवेतः स्याथ् स्या दनवेतो ऽनवेतः स्यात् ।

36) 2.6.3.5(29)- अनवेतः ।

अनवेत इत्यनव - इतः ।

37) 2.6.3.5(30)- स्यात् । अथ ।

स्या दथाथ स्याथ् स्या दथ ।

38) 2.6.3.5(31)- अथ । यजमानः ।

अथ यजमानो यजमानो ऽथाथ यजमानः ।

39) 2.6.3.5(32)- यजमानः । प्र ।

यजमानः प्र प्र यजमानो यजमानः प्र ।

40) 2.6.3.5(33)- प्र । मीयेत ।

प्र मीयेत मीयेत प्र प्र मीयेत ।

41) 2.6.3.5(34)- मीयेत । यत् ।

मीयेत यद् यन् मीयेत मीयेत यत् ।

42) 2.6.3.5(35)- यत् । द्वे ।

यद् द्वे द्वे यद् यद् द्वे ।

43) 2.6.3.5(36)- द्वे । नश्येताम् ।

द्वे नश्येताम् नश्येताम् द्वे द्वे नश्येताम् ।

44) 2.6.3.5(36)- द्वे ।

द्वे इति द्वे ।

45) 2.6.3.5(37)- नश्येताम् । द्वौ ।

नश्येताम् द्वौ द्वौ नश्येताम् नश्येताम् द्वौ ।

46) 2.6.3.5(38)- द्वौ । मासौ ।

द्वौ मासौ मासौ द्वौ द्वौ मासौ ।

47) 2.6.3.5(39)- मासौ । सँवथ्सरस्य ।

मासौ सँवथ्सरस्य सँवथ्सरस्य मासौ मासौ सँवथ्सरस्य ।

48) 2.6.3.5(40)- सँवथ्सरस्य । अनवेतौ ।

सँवथ्सरस्या नवेता वनवेतौ सँवथ्सरस्य सँवथ्सरस्या नवेतौ ।

49) 2.6.3.5(40)- सँवथ्सरस्य ।

सँवथ्सरस्येति सं - वथ्सरस्य ।

50) 2.6.3.5(41)- अनवेतौ । स्याताम् ।

अनवेतौ स्याता(गग्) स्याता मनवेता वनवेतौ स्याताम् ।

51) 2.6.3.5(41)- अनवेतौ ।

अनवेतावित्यनव - इतौ ।

52) 2.6.3.5(42)- स्याताम् । अथ ।

स्याता मथाथ स्याता(गग्) स्याता मथ ।

53) 2.6.3.5(43)- अथ । यजमानः ।

अथ यजमानो यजमानो ऽथाथ यजमानः ।

54) 2.6.3.5(44)- यजमानः । प्र ।

यजमानः प्र प्र यजमानो यजमानः प्र ।

55) 2.6.3.5(45)- प्र । मीयेत ।

प्र मीयेत मीयेत प्र प्र मीयेत ।

56) 2.6.3.5(46)- मीयेत । सङ्ख्याय ।

मीयेत सङ्ख्याय सङ्ख्याय मीयेत मीयेत सङ्ख्याय ।

57) 2.6.3.5(47)- सङ्ख्याय । उत् ।

सङ्ख्यायो दुथ् सङ्ख्याय सङ्ख्यायोत् ।

58) 2.6.3.5(47)- सङ्ख्याय ।

सङ्ख्यायेति सं - ख्याय ।

59) 2.6.3.5(48)- उत् । वासयति ।

उद् वासयति वासय त्युदुद् वासयति ।

60) 2.6.3.5(49)- वासयति । यजमानस्य ।

वासयति यजमानस्य यजमानस्य वासयति वासयति यजमानस्य ।

61) 2.6.3.5(50)- यजमानस्य । गोपीथाय ।

यजमानस्य गोपीथाय गोपीथाय यजमानस्य यजमानस्य गोपीथाय ।

1) 2.6.3.6(1)- गोपीथाय । यदि ।

गोपीथाय यदि यदि गोपीथाय गोपीथाय यदि ।

2) 2.6.3.6(2)- यदि । नश्येत् ।

यदि नश्येन् नश्येद् यदि यदि नश्येत् ।

3) 2.6.3.6(3)- नश्येत् । आश्विनम् ।

नश्येदाश्विन माश्विनम् नश्येन् नश्ये दाश्विनम् ।

4) 2.6.3.6(4)- आश्विनम् । द्विकपालम् ।

आश्विनम् द्विकपालम् द्विकपाल माश्विन माश्विनम् द्विकपालम् ।

5) 2.6.3.6(5)- द्विकपालम् । निः ।

द्विकपालम् निर् णिर् द्विकपालम् द्विकपालम् निः ।

6) 2.6.3.6(5)- द्विकपालम् ।

द्विकपालमिति द्वि – कपालम् ।

7) 2.6.3.6(6)- निः । वपेत् ।

निर् वपेद् वपेन् निर् णिर् वपेत् ।

8) 2.6.3.6(7)- वपेत् । द्यावापृथिव्यम् ।

वपेद् द्यावापृथिव्यम् द्यावापृथिव्यं ँवपेद् वपेद् द्यावापृथिव्यम् ।

9) 2.6.3.6(8)- द्यावापृथिव्यम् । एककपालम् ।

द्यावापृथिव्य मेककपाल मेककपालम् द्यावापृथिव्यम् द्यावापृथिव्य मेककपालम् ।

10) 2.6.3.6(8)- द्यावापृथिव्यम् ।

द्यावापृथिव्यमिति द्यावा – पृथिव्यम् ।

11) 2.6.3.6(9)- एककपालम् । अश्विनौ ।

एककपाल मश्विना वश्विना वेककपाल मेककपाल मश्विनौ ।

12) 2.6.3.6(9)- एककपालम् ।

एककपालमित्येक – कपालम् ।

13) 2.6.3.6(10)- अश्विनौ । वै ।

अश्विनौ वै वा अश्विना वश्विनौ वै ।

14) 2.6.3.6(11)- वै । देवानाम् ।

वै देवानाम् देवानां ँवै वै देवानाम् ।

15) 2.6.3.6(12)- दे॒वाना᳚म् । भि॒षजौ᳚ ।

दे॒वाना᳚म् भि॒षजौ॑ भि॒षजौ॑ दे॒वाना᳚म् दे॒वाना᳚म् भि॒षजौ᳚ ।

16) 2.6.3.6(13)- भि॒षजौ᳚ । ताभ्या᳚म् ।

भि॒षजौ॒ ताभ्या॒म् ताभ्या᳚म् भि॒षजौ॑ भि॒षजौ॒ ताभ्या᳚म् ।

17) 2.6.3.6(14)- ताभ्या᳚म् । ए॒व ।

ताभ्या॑ मे॒वैव ताभ्या॒म् ताभ्या॑ मे॒व ।

18) 2.6.3.6(15)- ए॒व । अ॒स्मै॒ ।

ए॒वास्मा॑ अस्मा ए॒वैवास्मै᳚ ।

19) 2.6.3.6(16)- अ॒स्मै॒ । भे॒ष॒जम् ।

अ॒स्मै॒ भे॒ष॒जम् भे॑ष॒ज म॑स्मा अस्मै भे॒ष॒जम् ।

20) 2.6.3.6(17)- भे॒ष॒जम् । क॒रो॒ति॒ ।

भे॒ष॒जम् क॑रोति करोति भेष॒जम् भे॑ष॒जम् क॑रोति ।

21) 2.6.3.6(18)- क॒रो॒ति॒ । द्या॒वा॒पृ॒थि॒व्यः॑ ।

क॒रो॒ति॒ द्या॒वा॒पृ॒थि॒व्यौ᳚ द्यावापृथि॒व्यः॑ करोति करोति द्यावापृथि॒व्यः॑ ।

22) 2.6.3.6(19)- द्या॒वा॒पृ॒थि॒व्यः॑ । एक॑कपालः ।

द्या॒वा॒पृ॒थि॒व्य॑ एक॑कपाल॒ एक॑कपालो द्यावापृथि॒व्यौ᳚ द्यावापृथि॒व्य॑ एक॑कपालः ।

23) 2.6.3.6(19)- द्या॒वा॒पृ॒थि॒व्यः॑ ।

द्या॒वा॒पृ॒थि॒व्य॑ इति॑ द्यावा - पृ॒थि॒व्यः॑ ।

24) 2.6.3.6(20)- एक॑कपालः । भ॒व॒ति॒ ।

एक॑कपालो भवति भव॒ त्येक॑कपाल॒ एक॑कपालो भवति ।

25) 2.6.3.6(20)- एकंकपालः ।

एकंकपाल इत्येकं - कपालः ।

26) 2.6.3.6(21)- भवति । अनयोः ।

भव त्यनयो रनयोर् भवति भव त्यनयोः ।

27) 2.6.3.6(22)- अनयोः । वै ।

अनयोर् वै वा अनयो रनयोर् वै ।

28) 2.6.3.6(23)- वै । एतत् ।

वा एत देतद् वै वा एतत् ।

29) 2.6.3.6(24)- एतत् । नश्यति ।

एतन् नश्यति नश्य त्येत देतन् नश्यति ।

30) 2.6.3.6(25)- नश्यति । यत् ।

नश्यति यद् यन् नश्यति नश्यति यत् ।

31) 2.6.3.6(26)- यत् । नश्यति ।

यन् नश्यति नश्यति यद् यन् नश्यति ।

32) 2.6.3.6(27)- नश्यति । अनयोः ।

नश्य त्यनयो रनयोर् नश्यति नश्य त्यनयोः ।

33) 2.6.3.6(28)- अनयोः । एव ।

अनयो रेवैवा नयो रनयो रेव ।

34) 2.6.3.6(29)- एव । एनत् ।

एवैन देन देवैवैनत् ।

35) 2.6.3.6(30)- एनत् । विन्दति ।

एनद् विन्दति विन्द त्येन देनद् विन्दति ।

36) 2.6.3.6(31)- विन्दति । प्रतिष्ठित्यै ॥

विन्दति प्रतिष्ठित्यै प्रतिष्ठित्यै विन्दति विन्दति प्रतिष्ठित्यै ।

37) 2.6.3.6(32)- प्रतिष्ठित्यै ॥

प्रतिष्ठित्या इति प्रति - स्थित्यै ।

=========

## 2.6.4 अनुवाकम् 4 – जटा

1) 2.6.4.1(1)- देवस्य । त्वा ।

देवस्य त्वा त्वा देवस्य देवस्य त्वा ।

2) 2.6.4.1(2)- त्वा । सवितुः ।

त्वा सवितुः सवितु स्त्वा त्वा सवितुः ।

3) 2.6.4.1(3)- सवितुः । प्रसवे ।

सवितुः प्रसवे प्रसवे सवितुः सवितुः प्रसवे ।

4) 2.6.4.1(4)- प्रसवे । इति ।

प्रसव इतीति प्रसवे प्रसव इति ।

5) 2.6.4.1(4)- प्रसवे ।

प्रसव इति प्र - सवे ।

6) 2.6.4.1(5)- इति । स्फ्यम् ।

इति स्फ्य(गग्) स्फ्य मितीति स्फ्यम् ।

7) 2.6.4.1(6)- स्फ्यम् । आ ।

स्फ्य मा स्फ्य(गग्) स्फ्य मा ।

8) 2.6.4.1(7)- आ । दत्ते ।

आ दत्ते दत्त आ दत्ते ।

9) 2.6.4.1(8)- दत्ते । प्रसूत्यै ।

दत्ते प्रसूत्यै प्रसूत्यै दत्ते दत्ते प्रसूत्यै ।

10) 2.6.4.1(9)- प्रसूत्यै । अश्विनोः ।

प्रसूत्या अश्विनो रश्विनोः प्रसूत्यै प्रसूत्या अश्विनोः ।

11) 2.6.4.1(9)- प्रसूत्यै ।

प्रसूत्या इति प्र - सूत्यै ।

12) 2.6.4.1(10)- अश्विनोः । बाहुभ्याम् ।

अश्विनोर् बाहुभ्याम् बाहुभ्या मश्विनो रश्विनोर् बाहुभ्याम् ।

13) 2.6.4.1(11)- बाहुभ्याम् । इति ।

बाहुभ्या मितीति बाहुभ्याम् बाहुभ्या मिति ।

14) 2.6.4.1(11)- बाहुभ्याम् ।

बाहुभ्यामिति बाहु - भ्याम् ।

15) 2.6.4.1(12)- इति । आह ।

इत्याहाहे तीत्याह ।

16) 2.6.4.1(13)- आह । अश्विनौ ।

आहाश्विना वश्विना वाहा हाश्विनौ ।

17) 2.6.4.1(14)- अश्विनौ । हि ।

अश्विनौ हि ह्यश्विना वश्विनौ हि ।

18) 2.6.4.1(15)- हि । देवानाम् ।

हि देवानाम् देवाना(ग्म्) हि हि देवानाम् ।

19) 2.6.4.1(16)- देवानाम् । अद्ध्वर्यू ।

देवाना मद्ध्वर्यू अद्ध्वर्यू देवानाम् देवाना मद्ध्वर्यू ।

20) 2.6.4.1(17)- अद्ध्वर्यू । आस्ताम् ।

अद्ध्वर्यू आस्ता मास्ता मद्ध्वर्यू अद्ध्वर्यू आस्ताम् ।

21) 2.6.4.1(17)- अ॒द्ध्व॒र्यू ।

अ॒द्ध्व॒र्यू इत्य॑द्ध्व॒र्यू ।

22) 2.6.4.1(18)- आस्ता॒॑म् । पू॒ष्णः ।

आस्ता॒॑म् पू॒ष्णः पू॒ष्ण आस्ता॒ मास्ता॒॑म् पू॒ष्णः ।

23) 2.6.4.1(19)- पू॒ष्णः । हस्ता॒॑भ्याम् ।

पू॒ष्णो हस्ता॒॑भ्या॒(ग्म्॒) हस्ता॒॑भ्याम् पू॒ष्णः पू॒ष्णो हस्ता॒॑भ्याम् ।

24) 2.6.4.1(20)- हस्ता॒॑भ्याम् । इति॑ ।

हस्ता॒॑भ्या॒ मितीति॒ हस्ता॒॑भ्या॒(ग्म्॒) हस्ता॒॑भ्या॒ मिति॑ ।

25) 2.6.4.1(21)- इति॑ । आ॒ह॒ ।

इत्या॑हा॒हे तीत्या॑ह ।

26) 2.6.4.1(22)- आ॒ह॒ । यत्यै॒॑ ।

आ॒ह॒ यत्यै॒ यत्या॑ आहा॒ह यत्यै॒॑ ।

27) 2.6.4.1(23)- यत्यै॒॑ । श॒तभृ॑ष्टिः ।

यत्यै॑ श॒तभृ॑ष्टिः श॒तभृ॑ष्टि॒र् यत्यै॒ यत्यै॑ श॒तभृ॑ष्टिः ।

28) 2.6.4.1(24)- श॒तभृ॑ष्टिः । अ॒सि॒ ।

श॒तभृ॑ष्टि रस्यसि श॒तभृ॑ष्टिः श॒तभृ॑ष्टि रसि ।

29) 2.6.4.1(24)- श॒तभृ॑ष्टिः ।

श॒तभृ॑ष्टि॒रिति॑ श॒त - भृ॒ष्टि॒ः ।

30) 2.6.4.1(25)- अ॒सि॒ । वा॒न॒स्प॒त्यः ।

अ॒सि॒ वा॒न॒स्प॒त्यो वा॑नस्प॒त्यो॒॑ ऽस्यसि वानस्प॒त्यः ।

31) 2.6.4.1(26)- वानस्पत्यः । द्विषतः ।

वानस्पत्यो द्विषतो द्विषतो वानस्पत्यो वानस्पत्यो द्विषतः ।

32) 2.6.4.1(27)- द्विषतः । वधः ।

द्विषतो वधो वधो द्विषतो द्विषतो वधः ।

33) 2.6.4.1(28)- वधः । इति ।

वध इतीति वधो वध इति ।

34) 2.6.4.1(29)- इति । आह ।

इत्या हाहे तीत्याह ।

35) 2.6.4.1(30)- आह । वज्रम् ।

आह वज्रं ँवज्र माहाह वज्रम् ।

36) 2.6.4.1(31)- वज्रम् । एव ।

वज्र मेवैव वज्रं ँवज्र मेव ।

37) 2.6.4.1(32)- एव । तत् ।

एव तत् तदेवैव तत् ।

38) 2.6.4.1(33)- तत् । सम् ।

तथ् स(ग्म्) सम् तत् तथ् सम् ।

39) 2.6.4.1(34)- सम् । श्यति ।

स(ग्ग्) श्यति श्यति स(ग्म्) स(ग्ग्) श्यति ।

40) 2.6.4.1(35)- श्यति । भ्रातृव्याय ।

श्यति भ्रातृव्याय भ्रातृव्याय श्यति श्यति भ्रातृव्याय ।

41) 2.6.4.1(36)- भ्रातृव्याय । प्रहरिष्यन्न् ।

भ्रातृव्याय प्रहरिष्यन् प्रहरिष्यन् भ्रातृव्याय भ्रातृव्याय प्रहरिष्यन्न् ।

42) 2.6.4.1(37)- प्रहरिष्यन्न् । स्तम्बयजुः ।

प्रहरिष्यन् थ्स्तम्बयजुः स्तम्बयजुः प्रहरिष्यन् प्रहरिष्यन् थ्स्तम्बयजुः ।

43) 2.6.4.1(37)- प्रहरिष्यन्न् ।

प्रहरिष्यन्निति प्र – हरिष्यन्न् ।

44) 2.6.4.1(38)- स्तम्बयजुः । हरति ।

स्तम्बयजुर्. हरति हरति स्तम्बयजुः स्तम्बयजुर्. हरति ।

45) 2.6.4.1(38)- स्तम्बयजुः ।

स्तम्बयजुरिति स्तम्ब – यजुः ।

46) 2.6.4.1(39)- हरति । एतावती ।

हर त्येताव त्येतावती हरति हर त्येतावती ।

47) 2.6.4.1(40)- एतावती । वै ।

एतावती वै वा एताव त्येतावती वै ।

48) 2.6.4.1(41)- वै । पृथिवी ।

वै पृथिवी पृथिवी वै वै पृथिवी ।

49) 2.6.4.1(42)- पृथिवी । यावती ।

पृथिवी यावती यावती पृथिवी पृथिवी यावती ।

50) 2.6.4.1(43)- यावती । वेदिः ।

यावती वेदिर् वेदिर् यावती यावती वेदिः ।

51) 2.6.4.1(44)- वेदिः । तस्याः ।

वेदि स्तस्या स्तस्या वेदिर् वेदि स्तस्याः ।

52) 2.6.4.1(45)- तस्याः । एतावतः ।

तस्या एतावत एतावत स्तस्या स्तस्या एतावतः ।

53) 2.6.4.1(46)- एतावतः । एव ।

एतावत एवै वैतावत एतावत एव ।

54) 2.6.4.1(47)- एव । भ्रातृव्यम् ।

एव भ्रातृव्यम् भ्रातृव्य मेवैव भ्रातृव्यम् ।

55) 2.6.4.1(48)- भ्रातृव्यम् । निः ।

भ्रातृव्यम् निर् णिर् भ्रातृव्यम् भ्रातृव्यम् निः ।

56) 2.6.4.1(49)- निः । भजति ।

निर् भजति भजति निर् णिर् भजति ।

57) 2.6.4.1(50)- भजति । तस्मात् ।

भजति तस्मात् तस्माद् भजति भजति तस्मात् ।

1) 2.6.4.2(1)- तस्मात् । न ।

तस्मान् न न तस्मात् तस्मान् न ।

2) 2.6.4.2(2)- न । अभागम् ।

नाभाग मभागम् न नाभागम् ।

3) 2.6.4.2(3)- अभागम् । निः ।

अभागम् निर् णिरभाग मभागम् निः ।

4) 2.6.4.2(4)- निः । भजन्ति ।

निर् भजन्ति भजन्ति निर् णिर् भजन्ति ।

5) 2.6.4.2(5)- भजन्ति । त्रिः ।

भजन्ति त्रि स्त्रिर् भजन्ति भजन्ति त्रिः ।

6) 2.6.4.2(6)- त्रिः । हरति ।

त्रिर्. हरति हरति त्रि स्त्रिर्. हरति ।

7) 2.6.4.2(7)- हरति । त्रयः ।

हरति त्रय स्त्रयो हरति हरति त्रयः ।

8) 2.6.4.2(8)- त्रयः । इमे ।

त्रय इम इमे त्रय स्त्रय इमे ।

9) 2.6.4.2(9)- इमे । लोकाः ।

इमे लोका लोका इम इमे लोकाः ।

10) 2.6.4.2(10)- लोकाः । एभ्यः ।

लोका एभ्य एभ्यो लोका लोका एभ्यः ।

11) 2.6.4.2(11)- एभ्यः । एव ।

एभ्य एवैवैभ्य एभ्य एव ।

12) 2.6.4.2(12)- एव । एनम् ।

एवैन मेन मेवैवैनम् ।

13) 2.6.4.2(13)- एनम् । लोकेभ्यः ।

एनम् ँल्लोकेभ्यो लोकेभ्य एन मेनम् ँल्लोकेभ्यः ।

14) 2.6.4.2(14)- लोकेभ्यः । निः ।

लोकेभ्यो निर् णिर् लोकेभ्यो लोकेभ्यो निः ।

15) 2.6.4.2(15)- निः । भजति ।

निर् भजति भजति निर् णिर् भजति ।

16) 2.6.4.2(16)- भजति । तूष्णीम् ।

भजति तूष्णीम् तूष्णीम् भजति भजति तूष्णीम् ।

17) 2.6.4.2(17)- तूष्णीम् । चतुर्थम् ।

तूष्णीम् चतुर्थम् चतुर्थम् तूष्णीम् तूष्णीम् चतुर्थम् ।

18) 2.6.4.2(18)- चतुर्थम् । हरति ।

चतुर्थ(ग्म्) हरति हरति चतुर्थम् चतुर्थ(ग्म्) हरति ।

19) 2.6.4.2(19)- हरति । अपरिमितात् ।

हर त्यपरिमिता दपरिमिता द्धरति हर त्यपरिमितात् ।

20) 2.6.4.2(20)- अपरिमितात् । एव ।

अपरिमिता देवैवा परिमिता दपरिमिता देव ।

21) 2.6.4.2(20)- अपरिमितात् ।

अपरिमितादित्यपरि - मितात् ।

22) 2.6.4.2(21)- एव । एनम् ।

एवैन मेन मेवैवैनम् ।

23) 2.6.4.2(22)- एनम् । निः ।

एनम् निर् णिरेन मेनम् निः ।

24) 2.6.4.2(23)- निः । भजति ।

निर् भजति भजति निर् णिर् भजति ।

25) 2.6.4.2(24)- भजति । उत् ।

भज त्युदुद् भजति भज त्युत् ।

26) 2.6.4.2(25)- उत् । हन्ति ।

उद्धन्ति ह न्त्युदु द्धन्ति ।

27) 2.6.4.2(26)- हन्ति । यत् ।

हन्ति यद् य द्धन्ति हन्ति यत् ।

28) 2.6.4.2(27)- यत् । एव ।

यदेवैव यद् यदेव ।

29) 2.6.4.2(28)- एव । अस्याः ।

एवास्या अस्या एवैवास्याः ।

30) 2.6.4.2(29)- अस्याः । अमेद्ध्यम् ।

अस्या अमेद्ध्य ममेद्ध्य मस्या अस्या अमेद्ध्यम् ।

31) 2.6.4.2(30)- अमेद्ध्यम् । तत् ।

अमेद्ध्यम् तत् तदमेद्ध्य ममेद्ध्यम् तत् ।

32) 2.6.4.2(31)- तत् । अप ।

तदपाप तत् तदप ।

33) 2.6.4.2(32)- अप । हन्ति ।

अप हन्ति ह न्त्यपाप हन्ति ।

34) 2.6.4.2(33)- हन्ति । उत् ।

ह न्त्युदु द्धन्ति हन्त्युत् ।

35) 2.6.4.2(34)- उत् । हन्ति ।

उद्धन्ति हन्त्युदु द्धन्ति ।

36) 2.6.4.2(35)- हन्ति । तस्मात् ।

हन्ति तस्मात् तस्मा द्धन्ति हन्ति तस्मात् ।

37) 2.6.4.2(36)- तस्मात् । ओषधयः ।

तस्मा दोषधय ओषधय स्तस्मात् तस्मा दोषधयः ।

38) 2.6.4.2(37)- ओषधयः । परा ।

ओषधयः परा परौषधय ओषधयः परा ।

39) 2.6.4.2(38)- परा । भवन्ति ।

परा भवन्ति भवन्ति परा परा भवन्ति ।

40) 2.6.4.2(39)- भवन्ति । मूलम् ।

भवन्ति मूलम् मूलम् भवन्ति भवन्ति मूलम् ।

41) 2.6.4.2(40)- मूलम् । छिनत्ति ।

मूलम् छिनत्ति छिनत्ति मूलम् मूलम् छिनत्ति ।

42) 2.6.4.2(41)- छिनत्ति । भ्रातृव्यस्य ।

छिनत्ति भ्रातृव्यस्य भ्रातृव्यस्य छिनत्ति छिनत्ति भ्रातृव्यस्य ।

43) 2.6.4.2(42)- भ्रातृव्यस्य । एव ।

भ्रातृव्य स्यैवैव भ्रातृव्यस्य भ्रातृव्य स्यैव ।

44) 2.6.4.2(43)- एव । मूलम् ।

एव मूलम् मूल मेवैव मूलम् ।

45) 2.6.4.2(44)- मूलम् । छिनत्ति ।

मूलम् छिनत्ति छिनत्ति मूलम् मूलम् छिनत्ति ।

46) 2.6.4.2(45)- छिनत्ति । पितृदेवत्या ।

छिनत्ति पितृदेवत्या पितृदेवत्या छिनत्ति छिनत्ति पितृदेवत्या ।

47) 2.6.4.2(46)- पितृदेवत्या । अतिखाता ।

पितृदेवत्या ऽतिखाता ऽतिखाता पितृदेवत्या पितृदेवत्या ऽतिखाता ।

48) 2.6.4.2(46)- पितृदेवत्या ।

पितृदेवत्येति पितृ - देवत्या ।

49) 2.6.4.2(47)- अतिखाता । इयतीम् ।

अतिखातेयती मियती मतिखाता ऽतिखातेयतीम् ।

50) 2.6.4.2(47)- अतिखाता ।

अतिखातेत्यति - खाता ।

51) 2.6.4.2(48)- इयतीम् । खनति ।

इयतीम् खनति खनतीयती मियतीम् खनति ।

52) 2.6.4.2(49)- खनति । प्रजापतिना ।

खनति प्रजापतिना प्रजापतिना खनति खनति प्रजापतिना ।

53) 2.6.4.2(50)- प्रजापतिना । यज्ञमुखेन ।

प्रजापतिना यज्ञमुखेन यज्ञमुखेन प्रजापतिना प्रजापतिना यज्ञमुखेन ।

54) 2.6.4.2(50)- प्रजापतिना ।

प्रजापतिनेति प्रजा - पतिना ।

1) 2.6.4.3(1)- यज्ञमुखेन । सम्मिताम् ।

यज्ञमुखेन सम्मिता(गम्) सम्मितां ँयज्ञमुखेन यज्ञमुखेन सम्मिताम् ।

2) 2.6.4.3(1)- यज्ञमुखेन ।

यज्ञमुखेनेति यज्ञ - मुखेन ।

3) 2.6.4.3(2)- सम्मिताम् । आ ।

सम्मिता मा सम्मिता(गम्) सम्मिता मा ।

4) 2.6.4.3(2)- सम्मिताम् ।

सम्मितामिति सं - मिताम् ।

5) 2.6.4.3(3)- आ । प्रतिष्ठायै ।

आ प्रतिष्ठायै प्रतिष्ठाया आ प्रतिष्ठायै ।

6) 2.6.4.3(4)- प्रतिष्ठायै । खनति ।

प्रतिष्ठायै खनति खनति प्रतिष्ठायै प्रतिष्ठायै खनति ।

7) 2.6.4.3(4)- प्रतिष्ठायै ।

प्रतिष्ठाया इति प्रति - स्थायै ।

8) 2.6.4.3(5)- खनति । यजमानम् ।

खनति यजमानं ँयजमानम् खनति खनति यजमानम् ।

9) 2.6.4.3(6)- यजमानम् । एव ।

यजमान मेवैव यजमानं ँयजमान मेव ।

10) 2.6.4.3(7)- एव । प्रतिष्ठाम् ।

एव प्रतिष्ठाम् प्रतिष्ठा मेवैव प्रतिष्ठाम् ।

11) 2.6.4.3(8)- प्रतिष्ठाम् । गमयति ।

प्रतिष्ठाम् गमयति गमयति प्रतिष्ठाम् प्रतिष्ठाम् गमयति ।

12) 2.6.4.3(8)- प्रतिष्ठाम् ।

प्रतिष्ठामिति प्रति - स्थाम् ।

13) 2.6.4.3(9)- गमयति । दक्षिणतः ।

गमयति दक्षिणतो दक्षिणतो गमयति गमयति दक्षिणतः ।

14) 2.6.4.3(10)- दक्षिणतः । वर्.षीयसीम् ।

दक्षिणतो वर्.षीयसीं ँवर्.षीयसीम् दक्षिणतो दक्षिणतो वर्.षीयसीम् ।

15) 2.6.4.3(11)- वर्.षीयसीम् । करोति ।

वर्.षीयसीम् करोति करोति वर्.षीयसीं ँवर्.षीयसीम् करोति ।

16) 2.6.4.3(12)- करोति । देवयजनस्य ।

करोति देवयजनस्य देवयजनस्य करोति करोति देवयजनस्य ।

17) 2.6.4.3(13)- देवयजनस्य । एव ।

देवयजन स्यैवैव देवयजनस्य देवयजन स्यैव ।

18) 2.6.4.3(13)- देवयजनस्य ।

देवयजनस्येति देव - यजनस्य ।

19) 2.6.4.3(14)- एव । रूपम् ।

एव रूप(ग्म्) रूप मेवैव रूपम् ।

20) 2.6.4.3(15)- रूपम् । अकः । (GS-2.6-11)

रूप मक रका रूप(ग्म्) रूप मकः ।

21) 2.6.4.3(16)- अकः । पुरीषवतीम् । (GS-2.6-11)

अकः पुरीषवतीम् पुरीषवती मक रकः पुरीषवतीम् ।

22) 2.6.4.3(17)- पुरीषवतीम् । करोति ।

पुरीषवतीम् करोति करोति पुरीषवतीम् पुरीषवतीम् करोति ।

23) 2.6.4.3(17)- पुरीषवतीम् ।

पुरीषवतीमिति पुरीष - वतीम् ।

24) 2.6.4.3(18)- करोति । प्रजा ।

करोति प्रजा प्रजा करोति करोति प्रजा ।

25) 2.6.4.3(19)- प्रजा । वै ।

प्रजा वै वै प्रजा प्रजा वै ।

26) 2.6.4.3(19)- प्रजा ।

प्रजेति प्र - जा ।

27) 2.6.4.3(20)- वै । पशवः ।

वै पशवः पशवो वै वै पशवः ।

28) 2.6.4.3(21)- पशवः । पुरीषम् ।

पशवः पुरीषम् पुरीषम् पशवः पशवः पुरीषम् ।

29) 2.6.4.3(22)- पुरीषम् । प्रजया ।

पुरीषम् प्रजया प्रजया पुरीषम् पुरीषम् प्रजया ।

30) 2.6.4.3(23)- प्रजया । एव ।

प्रजयैवैव प्रजया प्रजयैव ।

31) 2.6.4.3(23)- प्रजया ।

प्रजयेति प्र - जया ।

32) 2.6.4.3(24)- एव । एनम् ।

एवैन मेन मेवैवैनम् ।

33) 2.6.4.3(25)- एनम् । पशुभिः ।

एनम् पशुभिः पशुभि रेन मेनम् पशुभिः ।

34) 2.6.4.3(26)- पशुभिः । पुरीषवन्तम् ।

पशुभिः पुरीषवन्तम् पुरीषवन्तम् पशुभिः पशुभिः पुरीषवन्तम् ।

35) 2.6.4.3(26)- पशुभिः ।

पशुभिरिति पशु - भिः ।

36) 2.6.4.3(27)- पुरीषवन्तम् । करोति ।

पुरीषवन्तम् करोति करोति पुरीषवन्तम् पुरीषवन्तम् करोति ।

37) 2.6.4.3(27)- पुरीषवन्तम् ।

पुरीषवन्तमिति पुरीष - वन्तम् ।

38) 2.6.4.3(28)- करोति । उत्तरम् ।

करो त्युत्तर मुत्तरम् करोति करो त्युत्तरम् ।

39) 2.6.4.3(29)- उत्तरम् । परिग्राहम् ।

उत्तरम् परिग्राहम् परिग्राह मुत्तर मुत्तरम् परिग्राहम् ।

40) 2.6.4.3(29)- उत्तरम् ।

उत्तरमित्युत् - तरम् ।

41) 2.6.4.3(30)- परिग्राहम् । परि ।

परिग्राहम् परि परि परिग्राहम् परिग्राहम् परि ।

42) 2.6.4.3(30)- परिग्राहम् ।

परिग्राहमिति परि - ग्राहम् ।

43) 2.6.4.3(31)- परि । गृह्णाति ।

परि गृह्णाति गृह्णाति परि परि गृह्णाति ।

44) 2.6.4.3(32)- गृह्णाति । एतावती ।

गृह्णा त्येताव त्येतावती गृह्णाति गृह्णा त्येतावती ।

45) 2.6.4.3(33)- एतावती । वै ।

एतावती वै वा एताव त्येतावती वै ।

46) 2.6.4.3(34)- वै । पृथिवी ।

वै पृथिवी पृथिवी वै वै पृथिवी ।

47) 2.6.4.3(35)- पृथिवी । यावती ।

पृथिवी यावती यावती पृथिवी पृथिवी यावती ।

48) 2.6.4.3(36)- यावती । वेदिः ।

यावती वेदिर् वेदिर् यावती यावती वेदिः ।

49) 2.6.4.3(37)- वेदिः । तस्याः ।

वेदि स्तस्या स्तस्या वेदिर् वेदि स्तस्याः ।

50) 2.6.4.3(38)- तस्याः । एतावतः ।

तस्या एतावत एतावत स्तस्या स्तस्या एतावतः ।

51) 2.6.4.3(39)- एतावतः । एव ।

एतावत एवै वैतावत एतावत एव ।

52) 2.6.4.3(40)- एव । भ्रातृव्यम् ।

एव भ्रातृव्यम् भ्रातृव्य मेवैव भ्रातृव्यम् ।

53) 2.6.4.3(41)- भ्रातृव्यम् । निर्भज्य ।

भ्रातृव्यम् निर्भज्य निर्भज्य भ्रातृव्यम् भ्रातृव्यम् निर्भज्य ।

54) 2.6.4.3(42)- निर्भज्य । आत्मने ।

निर्भज्या त्मन आत्मने निर्भज्य निर्भज्या त्मने ।

55) 2.6.4.3(42)- निर्भज्य ।

निर्भज्येति निः – भज्य ।

56) 2.6.4.3(43)- आत्मने । उत्तरम् ।

आत्मन उत्तर मुत्तर मात्मन आत्मन उत्तरम् ।

57) 2.6.4.3(44)- उत्तरम् । परिग्राहम् ।

उत्तरम् परिग्राहम् परिग्राह मुत्तर मुत्तरम् परिग्राहम् ।

58) 2.6.4.3(44)- उत्तरम् ।

उत्तरमित्युत् – तरम् ।

59) 2.6.4.3(45)- परिग्राहम् । परि ।

परिग्राहम् परि परि परिग्राहम् परिग्राहम् परि ।

60) 2.6.4.3(45)- परिग्राहम् ।

परिग्राहमिति परि - ग्राहम् ।

61) 2.6.4.3(46)- परि । गृह्णाति ।

परि गृह्णाति गृह्णाति परि परि गृह्णाति ।

62) 2.6.4.3(47)- गृह्णाति । क्रूरम् ।

गृह्णाति क्रूरम् क्रूरम् गृह्णाति गृह्णाति क्रूरम् ।

63) 2.6.4.3(48)- क्रूरम् । इव ।

क्रूर मिवेव क्रूरम् क्रूर मिव ।

64) 2.6.4.3(49)- इव । वै ।

इव वै वा इवेव वै ।

65) 2.6.4.3(50)- वै । एतत् ।

वा एत देतद् वै वा एतत् ।

1) 2.6.4.4(1)- एतत् । करोति ।

एतत् करोति करो त्येत देतत् करोति ।

2) 2.6.4.4(2)- करोति । यत् ।

करोति यद् यत् करोति करोति यत् ।

3) 2.6.4.4(3)- यत् । वेदिम् ।

यद् वेदिं ँवेदिं ँयद् यद् वेदिम् ।

4) 2.6.4.4(4)- वेदिम् । करोति ।

वेदिम् करोति करोति वेदिं ँवेदिम् करोति ।

5) 2.6.4.4(5)- क॒रोति । धाः ।

क॒रो॒ति॒ धा धाः क॒रोति क॒रो॒ति॒ धाः ।

6) 2.6.4.4(6)- धाः । अ॒सि॒ । (GS-2.6-16)

धा अस्यसि॒ धा धा असि ।

7) 2.6.4.4(7)- अ॒सि॒ । स्व॒धा । (GS-2.6-16)

अ॒सि॒ स्व॒धा स्व॒धा ऽस्यसि स्व॒धा ।

8) 2.6.4.4(8)- स्व॒धा । अ॒सि॒ । (GS-2.6-16)

स्व॒धा अस्यसि स्व॒धा स्व॒धा असि ।

9) 2.6.4.4(8)- स्व॒धा । (GS-2.6-16)

स्व॒धेति स्व - धा ।

10) 2.6.4.4(9)- अ॒सि॒ । इति । (GS-2.6-16)

अ॒सीतीत्यस्य॒सीति ।

11) 2.6.4.4(10)- इति । यो॒यु॒प्य॒ते॒ ।

इति योयुप्यते योयुप्य॒त इतीति योयुप्यते ।

12) 2.6.4.4(11)- यो॒यु॒प्य॒ते॒ । शान्त्यै॑ ।

यो॒यु॒प्य॒ते॒ शान्त्यै॒ शान्त्यै योयुप्यते योयुप्य॒ते॒ शान्त्यै॑ ।

13) 2.6.4.4(12)- शान्त्यै॑ । प्रोक्षणीः ।

शान्त्यै॒ प्रोक्षणीः॒ प्रोक्षणीः॒ शान्त्यै॒ शान्त्यै॒ प्रोक्षणीः ।

14) 2.6.4.4(13)- प्रोक्षणीः । आ ।

प्रोक्षणी॒रा प्रोक्षणीः॒ प्रोक्षणी॒रा ।

15) 2.6.4.4(13)- प्रोक्षणीः ।

प्रोक्षणीरिति प्र - उक्षणीः ।

16) 2.6.4.4(14)- आ । सादयति ।

आ सादयति सादयत्या सादयति ।

17) 2.6.4.4(15)- सादयति । आपः ।

सादय त्याप आपः सादयति सादय त्यापः ।

18) 2.6.4.4(16)- आपः । वै ।

आपो वै वा आप आपो वै ।

19) 2.6.4.4(17)- वै । रक्षोघ्नीः ।

वै रक्षोघ्नी रक्षोघ्नीर् वै वै रक्षोघ्नीः ।

20) 2.6.4.4(18)- रक्षोघ्नीः । रक्षसाम् ।

रक्षोघ्नी रक्षसा(ग्म्) रक्षसा(ग्म्) रक्षोघ्नी रक्षोघ्नी रक्षसाम् ।

21) 2.6.4.4(18)- रक्षोघ्नीः ।

रक्षोघ्नीरिति रक्षः - घ्नीः ।

22) 2.6.4.4(19)- रक्षसाम् । अपहत्यै ।

रक्षसा मपहत्या अपहत्यै रक्षसा(ग्म्) रक्षसा मपहत्यै ।

23) 2.6.4.4(20)- अपहत्यै । स्फ्यस्य ।

अपहत्यै स्फ्यस्य स्फ्यस्या पहत्या अपहत्यै स्फ्यस्य ।

24) 2.6.4.4(20)- अपहत्यै ।

अपहत्या इत्यप - हत्यै ।

25) 2.6.4.4(21)- स्फ्यस्य । वर्त्मन्न् ।

स्फ्यस्य वर्त्मन्. वर्त्मन् थ्स्फ्यस्य स्फ्यस्य वर्त्मन्न् ।

26) 2.6.4.4(22)- वर्त्मन्न् । सादयति ।

वर्त्मन् थ्सादयति सादयति वर्त्मन्. वर्त्मन् थ्सादयति ।

27) 2.6.4.4(23)- सादयति । यज्ञस्य ।

सादयति यज्ञस्य यज्ञस्य सादयति सादयति यज्ञस्य ।

28) 2.6.4.4(24)- यज्ञस्य । सन्तत्यै ।

यज्ञस्य सन्तत्यै सन्तत्यै यज्ञस्य यज्ञस्य सन्तत्यै ।

29) 2.6.4.4(25)- सन्तत्यै । यम् ।

सन्तत्यै यं ँय(ग्म्) सन्तत्यै सन्तत्यै यम् ।

30) 2.6.4.4(25)- सन्तत्यै ।

सन्तत्या इति सं - तत्यै ।

31) 2.6.4.4(26)- यम् । द्विष्यात् ।

यम् द्विष्याद् द्विष्याद् यं ँयम् द्विष्यात् ।

32) 2.6.4.4(27)- द्विष्यात् । तम् ।

द्विष्यात् तम् तम् द्विष्याद् द्विष्यात् तम् ।

33) 2.6.4.4(28)- तम् । ध्यायेत् ।

तम् ध्यायेद् ध्यायेत् तम् तम् ध्यायेत् ।

34) 2.6.4.4(29)- ध्यायेत् । शुचा ।

ध्यायेच् छुचा शुचा ध्यायेद् ध्यायेच् छुचा ।

35) 2.6.4.4(30)- शुचा । एव ।

शुचैवैव शुचा शुचैव ।

36) 2.6.4.4(31)- एव । एनम् ।

एवैन मेन मेवैवैनम् ।

37) 2.6.4.4(32)- एनम् । अर्पयति ॥

एन मर्पय त्यर्पय त्येन मेन मर्पयति ।

38) 2.6.4.4(33)- अर्पयति ॥

अर्पयतीत्यर्पयति ।

=========

## 2.6.5 अनुवाकम् 5 – जटा

1) 2.6.5.1(1)- ब्रह्मवादिनः । वदन्ति ।

ब्रह्मवादिनो वदन्ति वदन्ति ब्रह्मवादिनो ब्रह्मवादिनो वदन्ति ।

2) 2.6.5.1(1)- ब्रह्मवादिनः ।

ब्रह्मवादिन इति ब्रह्म – वादिनः ।

3) 2.6.5.1(2)- वदन्ति । अद्भिः ।

वद न्त्यद्भि रद्भिर् वदन्ति वद न्त्यद्भिः ।

4) 2.6.5.1(3)- अद्भिः । हवी(ग्म्)षि ।

अद्भिर्. हवी(ग्म्)षि हवी(ग्ग्) ष्यद्भि रद्भिर्. हवी(ग्म्)षि ।

5) 2.6.5.1(3)- अद्भिः ।

अद्भिरित्यत् – भिः ।

6) 2.6.5.1(4)- हवी(ग्म्)षि । प्र ।

हवी(ग्म्)षि प्र प्र हवी(ग्म्)षि हवी(ग्म्)षि प्र ।

7) 2.6.5.1(5)- प्र । औक्षीः ।

प्रौक्षी रौक्षीः प्र प्रौक्षीः ।

8) 2.6.5.1(6)- औक्षीः । केन ।

औक्षीः केन केनौक्षी रौक्षीः केन ।

9) 2.6.5.1(7)- केन । अपः ।

केनापो ऽपः केन केनापः ।

10) 2.6.5.1(8)- अपः । इति ।

अप इतीत्यपो ऽप इति ।

11) 2.6.5.1(9)- इति । ब्रह्मणा ।

इति ब्रह्मणा ब्रह्मणेतीति ब्रह्मणा ।

12) 2.6.5.1(10)- ब्रह्मणा । इति ।

ब्रह्मणेतीति ब्रह्मणा ब्रह्मणेति ।

13) 2.6.5.1(11)- इति । ब्रूयात् ।

इति ब्रूयाद् ब्रूया दितीति ब्रूयात् ।

14) 2.6.5.1(12)- ब्रूयात् । अद्भिः ।

ब्रूया दद्भि रद्भिर् ब्रूयाद् ब्रूया दद्भिः ।

15) 2.6.5.1(13)- अद्भिः । हि ।

अद्भिर्. हि ह्यद्भि रद्भिर्. हि ।

16) 2.6.5.1(13)- अद्भिः ।

अद्भिरित्यत् - भिः ।

17) 2.6.5.1(14)- हि । एव ।

ह्येवैव हि ह्येव ।

18) 2.6.5.1(15)- एव । हवी(ग्म्)षि ।

एव हवी(ग्म्)षि हवी(ग्ग्) ष्येवैव हवी(ग्म्)षि ।

19) 2.6.5.1(16)- हवी(ग्म्)षि । प्रोक्षति ।

हवी(ग्म्)षि प्रोक्षति प्रोक्षति हवी(ग्म्)षि हवी(ग्म्)षि प्रोक्षति ।

20) 2.6.5.1(17)- प्रोक्षति । ब्रह्मणा ।

प्रोक्षति ब्रह्मणा ब्रह्मणा प्रोक्षति प्रोक्षति ब्रह्मणा ।

21) 2.6.5.1(17)- प्रोक्षति ।

प्रोक्षतीति प्र - उक्षति ।

22) 2.6.5.1(18)- ब्रह्मणा । अपः ।

ब्रह्मणा ऽपो ऽपो ब्रह्मणा ब्रह्मणा ऽपः ।

23) 2.6.5.1(19)- अपः । इद्ध्माबर्.हिः ।

अप इद्ध्माबर्.हि रिद्ध्माबर्.हि रपो ऽप इद्ध्माबर्.हिः ।

24) 2.6.5.1(20)- इद्ध्माबर्.हिः । प्र ।

इद्ध्माबर्.हिः प्र प्रेद्ध्माबर्.हि रिद्ध्माबर्.हिः प्र ।

25) 2.6.5.1(20)- इद्ध्माबर्.हिः ।

इद्ध्माबर्.हिरितीद्ध्मा - बर्.हिः ।

26) 2.6.5.1(21)- प्र । उक्षति ।

प्रोक्ष त्युक्षति प्र प्रोक्षति ।

27) 2.6.5.1(22)- उक्षति । मेद्ध्यम् ।

उक्षति मेद्ध्यम् मेद्ध्य मुक्ष त्युक्षति मेद्ध्यम् ।

28) 2.6.5.1(23)- मेद्ध्यम् । एव ।

मेद्ध्य मेवैव मेद्ध्यम् मेद्ध्य मेव ।

29) 2.6.5.1(24)- एव । एनत् ।

एवैन देन देवैवैनत् ।

30) 2.6.5.1(25)- एनत् । करोति ।

एनत् करोति करो त्येन देनत् करोति ।

31) 2.6.5.1(26)- क॒रो॒ति॒ । वेदि॑म् ।

क॒रो॒ति॒ वेदिं॒ ँवेदिं॑ करोति करोति॒ वेदि॑म् ।

32) 2.6.5.1(27)- वेदि॑म् । प्र । (GS-2.6-9)

वेदि॒म् प्र प्र वेदिं॒ ँवेदि॒म् प्र ।

33) 2.6.5.1(28)- प्र । उ॒क्ष॒ति॒ । (GS-2.6-9)

प्रोक्ष॑ त्युक्षति॒ प्र प्रोक्ष॑ति ।

34) 2.6.5.1(29)- उ॒क्ष॒ति॒ । ऋ॒क्षा । (GS-2.6-9)

उ॒क्ष॒ त्यृ॒क्ष र्‌क्षोक्ष॑ त्युक्ष त्यृ॒क्षा ।

35) 2.6.5.1(30)- ऋ॒क्षा । वै । (GS-2.6-9)

ऋ॒क्षा वै वा ऋ॒क्ष र्‌क्षा वै ।

36) 2.6.5.1(31)- वै । ए॒षा । (GS-2.6-9)

वा ए॒षैषा वै वा ए॒षा ।

37) 2.6.5.1(32)- ए॒षा । अ॒लो॒म॒का॑ । (GS-2.6-9)

ए॒षा ऽलो॒मका॑ ऽलो॒म कै॒षैषा ऽलो॒मका॑ ।

38) 2.6.5.1(33)- अ॒लो॒म॒का॑ । अ॒मे॒द्ध्या । (GS-2.6-9)

अ॒लो॒मका॑ ऽमे॒द्ध्या ऽमे॒द्ध्या ऽलो॒मका॑ ऽलो॒मका॑ ऽमे॒द्ध्या ।

39) 2.6.5.1(34)- अ॒मे॒द्ध्या । यत् ।

अ॒मे॒द्ध्या यद् यद॑मे॒द्ध्या ऽमे॒द्ध्या यत् ।

40) 2.6.5.1(35)- यत् । वेदिः॑ ।

यद् वेदि॒र् वेदि॒र् यद् यद् वेदिः॑ ।

41) 2.6.5.1(36)- वेदिः । मेद्ध्याम् ।

वेदिर् मेद्ध्याम् मेद्ध्यां ँवेदिर् वेदिर् मेद्ध्याम् ।

42) 2.6.5.1(37)- मेद्ध्याम् । एव ।

मेद्ध्या मेवैव मेद्ध्याम् मेद्ध्या मेव ।

43) 2.6.5.1(38)- एव । एनाम् ।

एवैना मेना मेवैवैनाम् ।

44) 2.6.5.1(39)- एनाम् । करोति ।

एनाम् करोति करो त्येना मेनाम् करोति ।

45) 2.6.5.1(40)- करोति । दिवे ।

करोति दिवे दिवे करोति करोति दिवे ।

46) 2.6.5.1(41)- दिवे । त्वा ।

दिवे त्वा त्वा दिवे दिवे त्वा ।

47) 2.6.5.1(42)- त्वा । अन्तरिक्षाय ।

त्वा ऽन्तरिक्षाया न्तरिक्षाय त्वा त्वा ऽन्तरिक्षाय ।

48) 2.6.5.1(43)- अन्तरिक्षाय । त्वा ।

अन्तरिक्षाय त्वा त्वा ऽन्तरिक्षाया न्तरिक्षाय त्वा ।

49) 2.6.5.1(44)- त्वा । पृथिव्यै ।

त्वा पृथिव्यै पृथिव्यै त्वा त्वा पृथिव्यै ।

50) 2.6.5.1(45)- पृथिव्यै । त्वा ।

पृथिव्यै त्वा त्वा पृथिव्यै पृथिव्यै त्वा ।

51) 2.6.5.1(46)- त्वा । इति ।

त्वेतीति त्वा त्वेति ।

52) 2.6.5.1(47)- इति । बर्.हिः ।

इति बर्.हिर् बर्.हि रितीति बर्.हिः ।

53) 2.6.5.1(48)- बर्.हिः । आसाद्य ।

बर्.हि रासाद्या साद्य बर्.हिर् बर्.हि रासाद्य ।

54) 2.6.5.1(49)- आसाद्य । प्र ।

आसाद्य प्र प्रासाद्या साद्य प्र ।

55) 2.6.5.1(49)- आसाद्य ।

आसाद्येत्या - साद्य ।

56) 2.6.5.1(50)- प्र । उक्षति ।

प्रोक्ष त्युक्षति प्र प्रोक्षति ।

1) 2.6.5.2(1)- उक्षति । एभ्यः ।

उक्ष त्येभ्य एभ्य उक्ष त्युक्ष त्येभ्यः ।

2) 2.6.5.2(2)- एभ्यः । एव ।

एभ्य एवैवैभ्य एभ्य एव ।

3) 2.6.5.2(3)- एव । एनत् ।

एवैन देन देवैवैनत् ।

4) 2.6.5.2(4)- एनत् । लोकेभ्यः ।

एन ल्लोकेभ्यो लोकेभ्य एन देन ल्लोकेभ्यः ।

5) 2.6.5.2(5)- लोकेभ्यः । प्र ।

लोकेभ्यः प्र प्र लोकेभ्यो लोकेभ्यः प्र ।

6) 2.6.5.2(6)- प्र । उक्षति ।

प्रोक्ष त्युक्षति प्र प्रोक्षति ।

7) 2.6.5.2(7)- उक्षति । क्रूरम् ।

उक्षति क्रूरम् क्रूर मुक्ष त्युक्षति क्रूरम् ।

8) 2.6.5.2(8)- क्रूरम् । इव ।

क्रूर मिवेव क्रूरम् क्रूर मिव ।

9) 2.6.5.2(9)- इव । वै ।

इव वै वा इवेव वै ।

10) 2.6.5.2(10)- वै । एतत् ।

वा एत देतद् वै वा एतत् ।

11) 2.6.5.2(11)- एतत् । करोति ।

एतत् करोति करो त्येत देतत् करोति ।

12) 2.6.5.2(12)- करोति । यत् ।

करोति यद् यत् करोति करोति यत् ।

13) 2.6.5.2(13)- यत् । खनति । (GS-2.6-10)

यत् खनति खनति यद् यत् खनति ।

14) 2.6.5.2(14)- खनति । अपः । (GS-2.6-10)

खनत्यपो ऽपः खनति खनत्यपः ।

15) 2.6.5.2(15)- अपः । नि । (GS-2.6-10)

अपो नि न्या(1)पो ऽपो नि ।

16) 2.6.5.2(16)- नि । नयति । (GS-2.6-10)

नि नयति नयति नि नि नयति ।

17) 2.6.5.2(17)- नयति । शान्त्यै । (GS-2.6-10)

नयति शान्त्यै शान्त्यै नयति नयति शान्त्यै ।

18) 2.6.5.2(18)- शान्त्यै । पुरस्तात् । (GS-2.6-10)

शान्त्यै पुरस्तात् पुरस्ताच् छान्त्यै शान्त्यै पुरस्तात् ।

19) 2.6.5.2(19)- पुरस्तात् । प्रस्तरम् ।

पुरस्तात् प्रस्तरम् प्रस्तरम् पुरस्तात् पुरस्तात् प्रस्तरम् ।

20) 2.6.5.2(20)- प्रस्तरम् । गृह्णाति ।

प्रस्तरम् गृह्णाति गृह्णाति प्रस्तरम् प्रस्तरम् गृह्णाति ।

21) 2.6.5.2(20)- प्रस्तरम् ।

प्रस्तरमिति प्र - स्तरम् ।

22) 2.6.5.2(21)- गृह्णाति । मुख्यम् ।

गृह्णाति मुख्यम् मुख्यम् गृह्णाति गृह्णाति मुख्यम् ।

23) 2.6.5.2(22)- मुख्यम् । एव ।

मुख्य मेवैव मुख्यम् मुख्य मेव ।

24) 2.6.5.2(23)- एव । एनम् ।

एवैन मेन मेवैवैनम् ।

25) 2.6.5.2(24)- एनम् । करोति ।

एनम् करोति करो त्येन मेनम् करोति ।

26) 2.6.5.2(25)- करोति । इयन्तम् ।

करोतीयन्त मियन्तम् करोति करोतीयन्तम् ।

27) 2.6.5.2(26)- इयन्तम् । गृह्णाति ।

इयन्तम् गृह्णाति गृह्णातीयन्त मियन्तम् गृह्णाति ।

28) 2.6.5.2(27)- गृह्णाति । प्रजापतिना ।

गृह्णाति प्रजापतिना प्रजापतिना गृह्णाति गृह्णाति प्रजापतिना ।

29) 2.6.5.2(28)- प्रजापतिना । यज्ञमुखेन ।

प्रजापतिना यज्ञमुखेन यज्ञमुखेन प्रजापतिना प्रजापतिना यज्ञमुखेन ।

30) 2.6.5.2(28)- प्रजापतिना ।

प्रजापतिनेति प्रजा - पतिना ।

31) 2.6.5.2(29)- यज्ञमुखेन । सम्मितम् ।

यज्ञमुखेन सम्मित(ग्म्) सम्मितं ँयज्ञमुखेन यज्ञमुखेन सम्मितम् ।

32) 2.6.5.2(29)- यज्ञमुखेन ।

यज्ञमुखेनेति यज्ञ - मुखेन ।

33) 2.6.5.2(30)- सम्मितम् । बर्.हिः ।

सम्मितम् बर्.हिर् बर्.हिः सम्मित(ग्म्) सम्मितम् बर्.हिः ।

34) 2.6.5.2(30)- सम्मितम् ।

सम्मितमिति सं - मितम् ।

35) 2.6.5.2(31)- बर्.हिः । स्तृणाति ।

बर्.हिः स्तृणाति स्तृणाति बर्.हिर् बर्.हिः स्तृणाति ।

36) 2.6.5.2(32)- स्तृणाति । प्रजाः ।

स्तृणाति प्रजाः प्रजाः स्तृणाति स्तृणाति प्रजाः ।

37) 2.6.5.2(33)- प्रजाः । वै ।

प्रजा वै वै प्रजाः प्रजा वै ।

38) 2.6.5.2(33)- प्रजाः ।

प्रजा इति प्र - जाः ।

39) 2.6.5.2(34)- वै । बर्.हिः ।

वै बर्.हिर् बर्.हिर् वै वै बर्.हिः ।

40) 2.6.5.2(35)- बर्.हिः । पृथिवी ।

बर्.हिः पृथिवी पृथिवी बर्.हिर् बर्.हिः पृथिवी ।

41) 2.6.5.2(36)- पृथिवी । वेदिः ।

पृथिवी वेदिर् वेदिः पृथिवी पृथिवी वेदिः ।

42) 2.6.5.2(37)- वेदिः । प्रजाः ।

वेदिः प्रजाः प्रजा वेदिर् वेदिः प्रजाः ।

43) 2.6.5.2(38)- प्रजाः । एव ।

प्रजा एवैव प्रजाः प्रजा एव ।

44) 2.6.5.2(38)- प्रजाः ।

प्रजा इति प्र - जाः ।

45) 2.6.5.2(39)- एव । पृथिव्याम् ।

एव पृथिव्याम् पृथिव्या मेवैव पृथिव्याम् ।

46) 2.6.5.2(40)- पृथिव्याम् । प्रति ।

पृथिव्याम् प्रति प्रति पृथिव्याम् पृथिव्याम् प्रति ।

47) 2.6.5.2(41)- प्रति । स्थापयति ।

प्रति ष्ठापयति स्थापयति प्रति प्रति ष्ठापयति ।

48) 2.6.5.2(42)- स्थापयति । अनतिदृश्ञम् ।

स्थापय त्यनतिदृश्ञ मनतिदृश्ञ(गग्) स्थापयति स्थापय त्यनतिदृश्ञम् ।

49) 2.6.5.2(43)- अनतिदृश्ञम् । स्तृणाति ।

अनतिदृश्ञ(गग्) स्तृणाति स्तृणा त्यनतिदृश्ञ मनतिदृश्ञ(गग्) स्तृणाति ।

50) 2.6.5.2(43)- अनतिदृश्ञम् ।

अनतिदृश्ञमित्यनति - दृश्ञम् ।

51) 2.6.5.2(44)- स्तृणाति । प्रजया ।

स्तृणाति प्रजया प्रजया स्तृणाति स्तृणाति प्रजया ।

52) 2.6.5.2(45)- प्रजया । एव ।

प्रजयैवैव प्रजया प्रजयैव ।

53) 2.6.5.2(45)- प्रजया ।

प्रजयेति प्र - जया ।

54) 2.6.5.2(46)- एव । एनम् ।

एवैन मेन मेवैवैनम् ।

55) 2.6.5.2(47)- एनम् । पशुभिः ।

एनम् पशुभिः पशुभि रेन मेनम् पशुभिः ।

56) 2.6.5.2(48)- पशुभिः । अनतिदृश्ञम् ।

पशुभि रनतिदृश्ञ मनतिदृश्ञम् पशुभिः पशुभि रनतिदृश्ञम् ।

57) 2.6.5.2(48)- पशुभिः ।

पशुभिरिति पशु - भिः ।

58) 2.6.5.2(49)- अनतिदृश्ञम् । करोति ।

अनतिदृश्ञम् करोति करो त्यनतिदृश्ञ मनतिदृश्ञम् करोति ।

59) 2.6.5.2(49)- अनतिदृश्ञम् ।

अनतिदृश्ञमित्यनति - दृश्ञम् ।

60) 2.6.5.2(50)- करोति । उत्तरम् ।

करो त्युत्तर मुत्तरम् करोति करो त्युत्तरम् ।

1) 2.6.5.3(1)- उत्तरम् । बर्.हिषः ।

उत्तरम् बर्.हिषो बर्.हिष उत्तर मुत्तरम् बर्.हिषः ।

2) 2.6.5.3(1)- उत्तरम् ।

उत्तरमित्युत् - तरम् ।

3) 2.6.5.3(2)- बर्.हिषः । प्रस्तरम् ।

बर्.हिषः प्रस्तरम् प्रस्तरम् बर्.हिषो बर्.हिषः प्रस्तरम् ।

4) 2.6.5.3(3)- प्रस्तरम् । सादयति ।

प्रस्तर(ग्म्) सादयति सादयति प्रस्तरम् प्रस्तर(ग्म्) सादयति ।

5) 2.6.5.3(3)- प्रस्तरम् ।

प्रस्तरमिति प्र - स्तरम् ।

6) 2.6.5.3(4)- सादयति । प्रजाः ।

सादयति प्रजाः प्रजाः सादयति सादयति प्रजाः ।

7) 2.6.5.3(5)- प्रजाः । वै ।

प्रजा वै वै प्रजाः प्रजा वै ।

8) 2.6.5.3(5)- प्रजाः ।

प्रजा इति प्र - जाः ।

9) 2.6.5.3(6)- वै । बर्.हिः ।

वै बर्.हिर् बर्.हिर् वै वै बर्.हिः ।

10) 2.6.5.3(7)- बर्.हिः । यजमानः ।

बर्.हिर् यजमानो यजमानो बर्.हिर् बर्.हिर् यजमानः ।

11) 2.6.5.3(8)- यजमानः । प्रस्तरः ।

यजमानः प्रस्तरः प्रस्तरो यजमानो यजमानः प्रस्तरः ।

12) 2.6.5.3(9)- प्रस्तरः । यजमानम् ।

प्रस्तरो यजमानं ँयजमानम् प्रस्तरः प्रस्तरो यजमानम् ।

13) 2.6.5.3(9)- प्रस्तरः ।

प्रस्तर इति प्र - स्तरः ।

14) 2.6.5.3(10)- यजमानम् । एव ।

यजमान मेवैव यजमानं ँयजमान मेव ।

15) 2.6.5.3(11)- एव । अयजमानात् ।

एवा यजमाना दयजमाना देवैवा यजमानात् ।

16) 2.6.5.3(12)- अयजमानात् । उत्तरम् ।

अयजमाना दुत्तर मुत्तर मयजमाना दयजमाना दुत्तरम् ।

17) 2.6.5.3(13)- उत्तरम् । करोति ।

उत्तरम् करोति करो त्युत्तर मुत्तरम् करोति ।

18) 2.6.5.3(13)- उत्तरम् ।

उत्तरमित्युत् - तरम् ।

19) 2.6.5.3(14)- करोति । तस्मात् ।

करोति तस्मात् तस्मात् करोति करोति तस्मात् ।

20) 2.6.5.3(15)- तस्मात् । यजमानः ।

तस्माद् यजमानो यजमान स्तस्मात् तस्माद् यजमानः ।

21) 2.6.5.3(16)- यजमानः । अयजमानात् ।

यजमानो ऽयजमाना दयजमानाद् यजमानो यजमानो ऽयजमानात् ।

22) 2.6.5.3(17)- अयजमानात् । उत्तरः ।

अयजमाना दुत्तर उत्तरो ऽयजमाना दयजमाना दुत्तरः ।

23) 2.6.5.3(18)- उत्तरः । अन्तः ।

उत्तरो ऽन्त रन्त रुत्तर उत्तरो ऽन्तः ।

24) 2.6.5.3(18)- उत्तरः ।

उत्तर इत्युत् - तरः ।

25) 2.6.5.3(19)- अ॒न्तः । द॒धा॒ति॒ ।

अ॒न्तर् द॑धाति दधा त्य॒न्त र॒न्तर् द॑धाति ।

26) 2.6.5.3(20)- द॒धा॒ति॒ । व्यावृ॑त्त्यै ।

द॒धा॒ति॒ व्यावृ॑त्त्यै॒ व्यावृ॑त्त्यै दधाति दधाति॒ व्यावृ॑त्त्यै ।

27) 2.6.5.3(21)- व्यावृ॑त्त्यै । अ॒नक्ति॑ ।

व्यावृ॑त्त्या अ॒न क्त्य॒नक्ति॒ व्यावृ॑त्त्यै॒ व्यावृ॑त्त्या अ॒नक्ति॑ ।

28) 2.6.5.3(21)- व्यावृ॑त्त्यै ।

व्यावृ॑त्त्या॒ इति॑ वि – आवृ॑त्त्यै ।

29) 2.6.5.3(22)- अ॒नक्ति॑ । ह॒विष्कृ॑तम् ।

अ॒नक्ति॑ ह॒विष्कृ॑त(ग्म्) ह॒विष्कृ॑त म॒नक्त्य॒नक्ति॑ ह॒विष्कृ॑तम् ।

30) 2.6.5.3(23)- ह॒विष्कृ॑तम् । ए॒व ।

ह॒विष्कृ॑त मे॒वैव ह॒विष्कृ॑त(ग्म्) ह॒विष्कृ॑त मे॒व ।

31) 2.6.5.3(23)- ह॒विष्कृ॑तम् ।

ह॒विष्कृ॑त॒मिति॑ ह॒विः – कृ॒त॒म् ।

32) 2.6.5.3(24)- ए॒व । ए॒न॒म् ।

ए॒वैन॑ मेन मे॒वैवैन॑म् ।

33) 2.6.5.3(25)- ए॒न॒म् । सु॒व॒र्गम् ।

ए॒न॒(ग्म्॒) सु॒व॒र्ग(ग्म्) सु॑व॒र्ग मे॑न मेन(ग्म्) सुव॒र्गम् ।

34) 2.6.5.3(26)- सु॒व॒र्गम् । लो॒कम् ।

सु॒व॒र्गम् ँल्लो॒कम् ँल्लो॒क(ग्म्) सु॑व॒र्ग(ग्म्) सु॑व॒र्गम् ँल्लो॒कम् ।

35) 2.6.5.3(26)- सुवर्गम् ।

सुवर्गमिति सुवः - गम् ।

36) 2.6.5.3(27)- लोकम् । गमयति ।

लोकम् गमयति गमयति लोकम् ँलोकम् गमयति ।

37) 2.6.5.3(28)- गमयति । त्रेधा ।

गमयति त्रेधा त्रेधा गमयति गमयति त्रेधा ।

38) 2.6.5.3(29)- त्रेधा । अनक्ति ।

त्रेधा ऽनक्त्यनक्ति त्रेधा त्रेधा ऽनक्ति ।

39) 2.6.5.3(30)- अनक्ति । त्रयः ।

अनक्ति त्रय स्त्रयो ऽनक्त्यनक्ति त्रयः ।

40) 2.6.5.3(31)- त्रयः । इमे ।

त्रय इम इमे त्रय स्त्रय इमे ।

41) 2.6.5.3(32)- इमे । लोकाः ।

इमे लोका लोका इम इमे लोकाः ।

42) 2.6.5.3(33)- लोकाः । एभ्यः ।

लोका एभ्य एभ्यो लोका लोका एभ्यः ।

43) 2.6.5.3(34)- एभ्यः । एव ।

एभ्य एवैवैभ्य एभ्य एव ।

44) 2.6.5.3(35)- एव । एनम् ।

एवैन मेन मेवैवैनम् ।

45) 2.6.5.3(36)- एनम् । लोकेभ्यः ।

एनम् ँल्लोकेभ्यो लोकेभ्य एन मेनम् ँल्लोकेभ्यः ।

46) 2.6.5.3(37)- लोकेभ्यः । अनक्ति ।

लोकेभ्यो ऽनक्त्यनक्ति लोकेभ्यो लोकेभ्यो ऽनक्ति ।

47) 2.6.5.3(38)- अनक्ति । न ।

अनक्ति न नान क्त्यनक्ति न ।

48) 2.6.5.3(39)- न । प्रति ।

न प्रति प्रति न न प्रति ।

49) 2.6.5.3(40)- प्रति । शृणाति ।

प्रति शृणाति शृणाति प्रति प्रति शृणाति ।

50) 2.6.5.3(41)- शृणाति । यत् ।

शृणाति यद् यच् छृणाति शृणाति यत् ।

51) 2.6.5.3(42)- यत् । प्रतिशृणीयात् ।

यत् प्रतिशृणीयात् प्रतिशृणीयाद् यद् यत् प्रतिशृणीयात् ।

52) 2.6.5.3(43)- प्रतिशृणीयात् । अनूर्द्ध्वम्भावुकम् ।

प्रतिशृणीया दनूर्द्ध्वम्भावुक मनूर्द्ध्वम्भावुकम् प्रतिशृणीयात् प्रतिशृणीया दनूर्द्ध्वम्भावुकम् ।

53) 2.6.5.3(43)- प्रतिशृणीयात् ।

प्रतिशृणीयादिति प्रति – शृणीयात् ।

54) 2.6.5.3(44)- अनूर्द्ध्वम्भावुकम् । यजमानस्य ।

अनूर्द्ध्वम्भावुकं ँयजमानस्य यजमानस्या नूर्द्ध्वम्भावुक मनूर्द्ध्वम्भावुकं ँयजमानस्य ।

55) 2.6.5.3(44)- अनूर्द्ध्वम्भावुकम् ।

अनूर्द्ध्वम्भावुकमित्यनूर्द्ध्वं - भावुकम् ।

56) 2.6.5.3(45)- यजमानस्य । स्यात् ।

यजमानस्य स्याथ् स्याद् यजमानस्य यजमानस्य स्यात् ।

57) 2.6.5.3(46)- स्यात् । उपरि ।

स्या दुपर्युपरि स्याथ् स्या दुपरि ।

58) 2.6.5.3(47)- उपरि । इव ।

उपरीवे वोपर्युप रीव ।

59) 2.6.5.3(48)- इव । प्र ।

इव प्र प्रेवेव प्र ।

60) 2.6.5.3(49)- प्र । हरति ।

प्र हरति हरति प्र प्र हरति ।

61) 2.6.5.3(50)- हरति । उपरि ।

हर त्युपर्युपरि हरति हर त्युपरि ।

1) 2.6.5.4(1)- उपरि । इव ।

उपरीवे वोपर्युप रीव ।

2) 2.6.5.4(2)- इव । हि ।

इव हि हीवेव हि ।

3) 2.6.5.4(3)- हि । सुवर्गः ।

हि सुवर्गः सुवर्गो हि हि सुवर्गः ।

4) 2.6.5.4(4)- सुवर्गः । लोकः ।

सुवर्गो लोको लोकः सुवर्गः सुवर्गो लोकः ।

5) 2.6.5.4(4)- सुवर्गः ।

सुवर्ग इति सुवः – गः ।

6) 2.6.5.4(5)- लोकः । नि ।

लोको नि नि लोको लोको नि ।

7) 2.6.5.4(6)- नि । यच्छति ।

नि यच्छति यच्छति नि नि यच्छति ।

8) 2.6.5.4(7)- यच्छति । वृष्टिम् ।

यच्छति वृष्टिं ँवृष्टिं ँयच्छति यच्छति वृष्टिम् ।

9) 2.6.5.4(8)- वृष्टिम् । एव ।

वृष्टि मेवैव वृष्टिं ँवृष्टि मेव ।

10) 2.6.5.4(9)- एव । अस्मै ।

एवास्मा अस्मा एवैवास्मै ।

11) 2.6.5.4(10)- अस्मै । नि ।

अस्मै नि न्यस्मा अस्मै नि ।

12) 2.6.5.4(11)- नि । यच्छति ।

नि यच्छति यच्छति नि नि यच्छति ।

13) 2.6.5.4(12)- यच्छति । न ।

यच्छति न न यच्छति यच्छति न ।

14) 2.6.5.4(13)- न । अत्यग्रम् ।

नात्यग्र मत्यग्रम् न नात्यग्रम् ।

15) 2.6.5.4(14)- अत्यग्रम् । प्र ।

अत्यग्रम् प्र प्रात्यग्र मत्यग्रम् प्र ।

16) 2.6.5.4(14)- अत्यग्रम् ।

अत्यग्रमित्यति - अग्रम् ।

17) 2.6.5.4(15)- प्र । हरेत् ।

प्र हरे द्धरेत् प्र प्र हरेत् ।

18) 2.6.5.4(16)- हरेत् । यत् ।

हरेद् यद् य द्धरे द्धरेद् यत् ।

19) 2.6.5.4(17)- यत् । अत्यग्रम् ।

यद त्यग्र मत्यग्रं ँयद् यद त्यग्रम् ।

20) 2.6.5.4(18)- अत्यग्रम् । प्रहरेत् ।

अत्यग्रम् प्रहरेत् प्रहरे दत्यग्र मत्यग्रम् प्रहरेत् ।

21) 2.6.5.4(18)- अत्यग्रम् ।

अत्यग्रमित्यति - अग्रम् ।

22) 2.6.5.4(19)- प्रहरेत् । अत्यासारिणी ।

प्रहरे दत्यासारि ण्यत्यासारिणी प्रहरेत् प्रहरे दत्यासारिणी ।

23) 2.6.5.4(19)- प्रहरेत् ।

प्रहरेदिति प्र - हरेत् ।

24) 2.6.5.4(20)- अत्यासारिणी । अद्ध्वर्योः ।

अत्यासारि ण्यद्ध्वर्यो रद्ध्वर्यो रत्यासारि ण्यत्यासारि ण्यद्ध्वर्योः ।

25) 2.6.5.4(20)- अत्यासारिणी ।

अत्यासारिणीत्यति - आसारिणी ।

26) 2.6.5.4(21)- अद्ध्वर्योः । नाशुका ।

अद्ध्वर्योर् नाशुका नाशुका ऽद्ध्वर्यो रद्ध्वर्योर् नाशुका ।

27) 2.6.5.4(22)- नाशुका । स्यात् ।

नाशुका स्याथ् स्यान् नाशुका नाशुका स्यात् ।

28) 2.6.5.4(23)- स्यात् । न ।

स्यान् न न स्याथ् स्यान् न ।

29) 2.6.5.4(24)- न । पुरस्तात् ।

न पुरस्तात् पुरस्तान् न न पुरस्तात् ।

30) 2.6.5.4(25)- पुरस्तात् । प्रति ।

पुरस्तात् प्रति प्रति पुरस्तात् पुरस्तात् प्रति ।

31) 2.6.5.4(26)- प्रति । अस्येत् ।

प्रत्यस्ये दस्येत् प्रति प्रत्यस्येत् ।

32) 2.6.5.4(27)- अस्येत् । यत् ।

अस्येद् यद् यदस्ये दस्येद् यत् ।

33) 2.6.5.4(28)- यत् । पुरस्तात् ।

यत् पुरस्तात् पुरस्ताद् यद् यत् पुरस्तात् ।

34) 2.6.5.4(29)- पुरस्तात् । प्रत्यस्येत् ।

पुरस्तात् प्रत्यस्येत् प्रत्यस्येत् पुरस्तात् पुरस्तात् प्रत्यस्येत् ।

35) 2.6.5.4(30)- प्रत्यस्येत् । सुवर्गात् ।

प्रत्यस्येथ् सुवर्गाथ् सुवर्गात् प्रत्यस्येत् प्रत्यस्येथ् सुवर्गात् ।

36) 2.6.5.4(30)- प्रत्यस्येत् ।

प्रत्यस्येदिति प्रति - अस्येत् ।

37) 2.6.5.4(31)- सुवर्गात् । लोकात् ।

सुवर्गा ल्लोका ल्लोकाथ् सुवर्गाथ् सुवर्गा ल्लोकात् ।

38) 2.6.5.4(31)- सुवर्गात् ।

सुवर्गादिति सुवः - गात् ।

39) 2.6.5.4(32)- लोकात् । यजमानम् ।

लोकाद् यजमानं ँयजमानम् ँलोका ल्लोकाद् यजमानम् ।

40) 2.6.5.4(33)- यजमानम् । प्रति ।

यजमानम् प्रति प्रति यजमानं ँयजमानम् प्रति ।

41) 2.6.5.4(34)- प्रति । नुदेत् ।

प्रति नुदेन् नुदेत् प्रति प्रति नुदेत् ।

42) 2.6.5.4(35)- नुदेत् । प्राञ्चम् ।

नुदेत् प्राञ्चम् प्राञ्चम् नुदेन् नुदेत् प्राञ्चम् ।

43) 2.6.5.4(36)- प्राञ्चम् । प्र ।

प्राञ्चम् प्र प्र प्राञ्चम् प्राञ्चम् प्र ।

44) 2.6.5.4(37)- प्र । हरति ।

प्र हरति हरति प्र प्र हरति ।

45) 2.6.5.4(38)- हरति । यजमानम् ।

हरति यजमानं ँयजमान(ग्म्) हरति हरति यजमानम् ।

46) 2.6.5.4(39)- यजमानम् । एव ।

यजमान मेवैव यजमानं ँयजमान मेव ।

47) 2.6.5.4(40)- एव । सुवर्गम् ।

एव सुवर्ग(ग्म्) सुवर्ग मेवैव सुवर्गम् ।

48) 2.6.5.4(41)- सुवर्गम् । लोकम् ।

सुवर्गम् ँलोकम् ँलोक(ग्म्) सुवर्ग(ग्म्) सुवर्गम् ँलोकम् ।

49) 2.6.5.4(41)- सुवर्गम् ।

सुवर्गमिति सुवः - गम् ।

50) 2.6.5.4(42)- लोकम् । गमयति ।

लोकम् गमयति गमयति लोकम् ँलोकम् गमयति ।

51) 2.6.5.4(43)- गमयति । न ।

गमयति न न गमयति गमयति न ।

52) 2.6.5.4(44)- न । विष्वञ्चम् ।

न विष्वञ्चं ँविष्वञ्चम् न न विष्वञ्चम् ।

53) 2.6.5.4(45)- विष्वञ्चम् । वि ।

विष्वञ्चं ँवि वि विष्वञ्चं ँविष्वञ्चं ँवि ।

54) 2.6.5.4(46)- वि । युयात् ।

वि युयाद् युयाद् वि वि युयात् ।

55) 2.6.5.4(47)- युयात् । यत् ।

युयाद् यद् यद् युयाद् युयाद् यत् ।

56) 2.6.5.4(48)- यत् । विष्वञ्चम् ।

यद् विष्वञ्चं ँविष्वञ्चं ँयद् यद् विष्वञ्चम् ।

57) 2.6.5.4(49)- विष्वञ्चम् । वियुयात् ।

विष्वञ्चं ँवियुयाद् वियुयाद् विष्वञ्चं ँविष्वञ्चं ँवियुयात् ।

58) 2.6.5.4(50)- वियुयात् । स्त्री ।

वियुयाथ् स्त्री स्त्री वियुयाद् वियुयाथ् स्त्री ।

59) 2.6.5.4(50)- वियुयात् ।

वियुयादिति वि - युयात् ।

1) 2.6.5.5(1)- स्त्री । अस्य ।

स्त्र्यस्यास्य स्त्री स्त्र्यस्य ।

2) 2.6.5.5(2)- अस्य । जायेत ।

अस्य जायेत जायेता स्यास्य जायेत ।

3) 2.6.5.5(3)- जायेत । ऊर्द्ध्वम् ।

जाये तोर्द्ध्व मूर्द्ध्वम् जायेत जाये तोर्द्ध्वम् ।

4) 2.6.5.5(4)- ऊर्द्ध्वम् । उत् । (GS-2.6-12)

ऊर्द्ध्व मुदु दूर्द्ध्व मूर्द्ध्व मुत् ।

5) 2.6.5.5(5)- उत् । यौति । (GS-2.6-12)

उद् यौति यौ त्युदुद् यौति ।

6) 2.6.5.5(6)- यौति । ऊर्द्ध्वम् । (GS-2.6-12)

यौत्यूर्द्ध्व मूर्द्ध्वं ँयौति यौत्यूर्द्ध्वम् ।

7) 2.6.5.5(7)- ऊर्द्ध्वम् । इव । (GS-2.6-12)

ऊर्द्ध्व मिवे वोर्द्ध्व मूर्द्ध्व मिव ।

8) 2.6.5.5(8)- इव । हि । (GS-2.6-12)

इव हि हीवेव हि ।

9) 2.6.5.5(9)- हि । पु(ग्म्)सः । (GS-2.6-12)

हि पु(ग्म्)सः पु(ग्म्)सो हि हि पु(ग्म्)सः ।

10) 2.6.5.5(10)- पु(ग्म्)सः । पुमान् । (GS-2.6-12)

पु(ग्म्)सः पुमान् पुमान् पु(ग्म्)सः पु(ग्म्)सः पुमान् ।

11) 2.6.5.5(11)- पुमान् । एव ।

पुमा नेवैव पुमान् पुमा नेव ।

12) 2.6.5.5(12)- एव । अस्य ।

एवास्या स्यैवै वास्य ।

13) 2.6.5.5(13)- अस्य । जायते ।

अस्य जायते जायते ऽस्यास्य जायते ।

14) 2.6.5.5(14)- जायते । यत् ।

जायते यद् यज् जायते जायते यत् ।

15) 2.6.5.5(15)- यत् । स्फ्येन ।

यथ् स्फ्येन स्फ्येन यद् यथ् स्फ्येन ।

16) 2.6.5.5(16)- स्फ्येन । वा ।

स्फ्येन वा वा स्फ्येन स्फ्येन वा ।

17) 2.6.5.5(17)- वा । उपवेषेण ।

वोपवेषे णोपवेषेण वा वोपवेषेण ।

18) 2.6.5.5(18)- उपवेषेण । वा ।

उपवेषेण वा वोपवेषे णोपवेषेण वा ।

19) 2.6.5.5(18)- उपवेषेण ।

उपवेषेणेत्युप - वेषेण ।

20) 2.6.5.5(19)- वा । योयुप्येत ।

वा योयुप्येत योयुप्येत वा वा योयुप्येत ।

21) 2.6.5.5(20)- योयुप्येत । स्तृतिः ।

योयुप्येत स्तृतिः स्तृतिर् योयुप्येत योयुप्येत स्तृतिः ।

22) 2.6.5.5(21)- स्तृतिः । एव ।

स्तृति रेवैव स्तृतिः स्तृति रेव ।

23) 2.6.5.5(22)- एव । अस्य ।

एवास्या स्यैवै वास्य ।

24) 2.6.5.5(23)- अस्य । सा ।

अस्य सा सा ऽस्यास्य सा ।

25) 2.6.5.5(24)- सा । हस्तेन ।

सा हस्तेन हस्तेन सा सा हस्तेन ।

26) 2.6.5.5(25)- हस्तेन । योयुप्यते ।

हस्तेन योयुप्यते योयुप्यते हस्तेन हस्तेन योयुप्यते ।

27) 2.6.5.5(26)- योयुप्यते । यजमानस्य ।

योयुप्यते यजमानस्य यजमानस्य योयुप्यते योयुप्यते यजमानस्य ।

28) 2.6.5.5(27)- यजमानस्य । गोपीथाय ।

यजमानस्य गोपीथाय गोपीथाय यजमानस्य यजमानस्य गोपीथाय ।

29) 2.6.5.5(28)- गोपीथाय । ब्रह्मवादिनः ।

गोपीथाय ब्रह्मवादिनो ब्रह्मवादिनो गोपीथाय गोपीथाय ब्रह्मवादिनः ।

30) 2.6.5.5(29)- ब्रह्मवादिनः । वदन्ति ।

ब्रह्मवादिनो वदन्ति वदन्ति ब्रह्मवादिनो ब्रह्मवादिनो वदन्ति ।

31) 2.6.5.5(29)- ब्रह्मवादिनः ।

ब्रह्मवादिन इति ब्रह्म – वादिनः ।

32) 2.6.5.5(30)- वदन्ति । किम् ।

वदन्ति किम् किँ वदन्ति वदन्ति किम् ।

33) 2.6.5.5(31)- किम् । यज्ञस्य ।

किँ यज्ञस्य यज्ञस्य किम् किँ यज्ञस्य ।

34) 2.6.5.5(32)- यज्ञस्य । यजमानः ।

यज्ञस्य यजमानो यजमानो यज्ञस्य यज्ञस्य यजमानः ।

35) 2.6.5.5(33)- यजमानः । इति ।

यजमान इतीति यजमानो यजमान इति ।

36) 2.6.5.5(34)- इति । प्रस्तरः ।

इति प्रस्तरः प्रस्तर इतीति प्रस्तरः ।

37) 2.6.5.5(35)- प्रस्तरः । इति ।

प्रस्तर इतीति प्रस्तरः प्रस्तर इति ।

38) 2.6.5.5(35)- प्रस्तरः ।

प्रस्तर इति प्र - स्तरः ।

39) 2.6.5.5(36)- इति । तस्य । (GS-2.6-13)

इति तस्य तस्ये तीति तस्य ।

40) 2.6.5.5(37)- तस्य । क्व । (GS-2.6-13)

तस्य क्वा(1) क्व तस्य तस्य क्व ।

41) 2.6.5.5(38)- क्व । सुवर्गः । (GS-2.6-13)

क्व सुवर्गः सुवर्गः क्वा(1) क्व सुवर्गः ।

42) 2.6.5.5(39)- सुवर्गः । लोकः । (GS-2.6-13)

सुवर्गो लोको लोकः सुवर्गः सुवर्गो लोकः ।

43) 2.6.5.5(39)- सुवर्गः । (GS-2.6-13)

सुवर्ग इति सुवः - गः ।

44) 2.6.5.5(40)- लोकः । इति । (GS-2.6-13)

लोक इतीति लोको लोक इति ।

45) 2.6.5.5(41)- इति । आहवनीयः ।

इत्याहवनीय आहवनीय इती त्याहवनीयः ।

46) 2.6.5.5(42)- आहवनीयः । इति ।

आहवनीय इती त्याहवनीय आहवनीय इति ।

47) 2.6.5.5(42)- आहवनीयः ।

आहवनीय इत्या - हवनीयः ।

48) 2.6.5.5(43)- इति । ब्रूयात् ।

इति ब्रूयाद् ब्रूया दितीति ब्रूयात् ।

49) 2.6.5.5(44)- ब्रूयात् । यत् ।

ब्रूयाद् यद् यद् ब्रूयाद् ब्रूयाद् यत् ।

50) 2.6.5.5(45)- यत् । प्रस्तरम् ।

यत् प्रस्तरम् प्रस्तरं यद् यत् प्रस्तरम् ।

51) 2.6.5.5(46)- प्रस्तरम् । आहवनीये ।

प्रस्तर माहवनीय आहवनीये प्रस्तरम् प्रस्तर माहवनीये ।

52) 2.6.5.5(46)- प्रस्तरम् ।

प्रस्तरमिति प्र - स्तरम् ।

53) 2.6.5.5(47)- आहवनीये । प्रहरति ।

आहवनीये प्रहरति प्रहर त्याहवनीय आहवनीये प्रहरति ।

54) 2.6.5.5(47)- आहवनीये ।

आहवनीय इत्या - हवनीये ।

55) 2.6.5.5(48)- प्रहरति । यजमानम् ।

प्रहरति यजमानं ँयजमानम् प्रहरति प्रहरति यजमानम् ।

56) 2.6.5.5(48)- प्रहरति ।

प्रहरतीति प्र - हरति ।

57) 2.6.5.5(49)- यजमानम् । एव ।

यजमान मेवैव यजमानं ँयजमान मेव ।

58) 2.6.5.5(50)- एव । सुवर्गम् ।

एव सुवर्ग(ग्म्) सुवर्ग मेवैव सुवर्गम् ।

1) 2.6.5.6(1)- सुवर्गम् । लोकम् ।

सुवर्गम् ँलोकम् ँलोक(ग्म्) सुवर्ग(ग्म्) सुवर्गम् ँलोकम् ।

2) 2.6.5.6(1)- सुवर्गम् ।

सुवर्गमिति सुवः - गम् ।

3) 2.6.5.6(2)- लोकम् । गमयति ।

लोकम् गमयति गमयति लोकम् ँलोकम् गमयति ।

4) 2.6.5.6(3)- गमयति । वि ।

गमयति वि वि गमयति गमयति वि ।

5) 2.6.5.6(4)- वि । वै ।

वि वै वै वि वि वै ।

6) 2.6.5.6(5)- वै । एतत् ।

वा एत देतद् वै वा एतत् ।

7) 2.6.5.6(6)- एतत् । यजमानः ।

एतद् यजमानो यजमान एत देतद् यजमानः ।

8) 2.6.5.6(7)- यजमानः । लिशते ।

यजमानो लिशते लिशते यजमानो यजमानो लिशते ।

9) 2.6.5.6(8)- लिशते । यत् ।

लिशते यद् यल्लिशते लिशते यत् ।

10) 2.6.5.6(9)- यत् । प्रस्तरम् ।

यत् प्रस्तरम् प्रस्तरं ँयद् यत् प्रस्तरम् ।

11) 2.6.5.6(10)- प्रस्तरम् । योयुप्यन्ते ।

प्रस्तरं ँयोयुप्यन्ते योयुप्यन्ते प्रस्तरम् प्रस्तरं ँयोयुप्यन्ते ।

12) 2.6.5.6(10)- प्रस्तरम् ।

प्रस्तरमिति प्र – स्तरम् ।

13) 2.6.5.6(11)- योयुप्यन्ते । बर्.हिः ।

योयुप्यन्ते बर्.हिर् बर्.हिर् योयुप्यन्ते योयुप्यन्ते बर्.हिः ।

14) 2.6.5.6(12)- बर्.हिः । अनु ।

बर्.हि रन्वनु बर्.हिर् बर्.हि रनु ।

15) 2.6.5.6(13)- अनु । प्र ।

अनु प्र प्रा ण्वनु प्र ।

16) 2.6.5.6(14)- प्र । हरति ।

प्र हरति हरति प्र प्र हरति ।

17) 2.6.5.6(15)- हरति । शान्त्यै ।

हरति शान्त्यै शान्त्यै हरति हरति शान्त्यै ।

18) 2.6.5.6(16)- शान्त्यै । अनारम्भणः ।

शान्त्या अनारम्भणो ऽनारम्भणः शान्त्यै शान्त्या अनारम्भणः ।

19) 2.6.5.6(17)- अनारम्भणः । इव ।

अनारम्भण इवे वानारम्भणो ऽनारम्भण इव ।

20) 2.6.5.6(17)- अनारम्भणः ।

अनारम्भण इत्यना - रम्भणः ।

21) 2.6.5.6(18)- इव । वै ।

इव वै वा इवेव वै ।

22) 2.6.5.6(19)- वै । एतर्.हि ।

वा एतर् ह्येतर्.हि वै वा एतर्.हि ।

23) 2.6.5.6(20)- एतर्.हि । अद्ध्वर्युः ।

एतर् ह्यद्ध्वर्यु रद्ध्वर्यु रेतर् ह्येतर् ह्यद्ध्वर्युः ।

24) 2.6.5.6(21)- अद्ध्वर्युः । सः ।

अद्ध्वर्युः स सो ऽद्ध्वर्यु रद्ध्वर्युः सः ।

25) 2.6.5.6(22)- सः । ईश्वरः ।

स ईश्वर ईश्वरः स स ईश्वरः ।

26) 2.6.5.6(23)- ईश्वरः । वेपनः ।

ईश्वरो वेपनो वेपन ईश्वर ईश्वरो वेपनः ।

27) 2.6.5.6(24)- वेपनः । भवितोः ।

वेपनो भवितोर् भवितोर् वेपनो वेपनो भवितोः ।

28) 2.6.5.6(25)- भवितोः । ध्रुवा ।

भवितोर् ध्रुवा ध्रुवा भवितोर् भवितोर् ध्रुवा ।

29) 2.6.5.6(26)- ध्रुवा । असि ।

ध्रुवा ऽस्यसि ध्रुवा ध्रुवा ऽसि ।

30) 2.6.5.6(27)- असि । इति ।

असीतीत्यस्यसीति ।

31) 2.6.5.6(28)- इति । इमाम् ।

इतीमा मिमा मितीतीमाम् ।

32) 2.6.5.6(29)- इमाम् । अभि ।

इमा मभ्यभीमा मिमा मभि ।

33) 2.6.5.6(30)- अभि । मृशति ।

अभि मृशति मृश त्यभ्यभि मृशति ।

34) 2.6.5.6(31)- मृशति । इयम् ।

मृशतीय मियम् मृशति मृशतीयम् ।

35) 2.6.5.6(32)- इयम् । वै ।

इयं ँवै वा इय मियं ँवै ।

36) 2.6.5.6(33)- वै । ध्रुवा ।

वै ध्रुवा ध्रुवा वै वै ध्रुवा ।

37) 2.6.5.6(34)- ध्रुवा । अस्याम् ।

ध्रुवा ऽस्या मस्याम् ध्रुवा ध्रुवा ऽस्याम् ।

38) 2.6.5.6(35)- अस्याम् । एव ।

अस्या मेवैवास्या मस्या मेव ।

39) 2.6.5.6(36)- एव । प्रति ।

एव प्रति प्रत्येवैव प्रति ।

40) 2.6.5.6(37)- प्रति । तिष्ठति ।

प्रति तिष्ठति तिष्ठति प्रति प्रति तिष्ठति ।

41) 2.6.5.6(38)- तिष्ठति । न ।

तिष्ठति न न तिष्ठति तिष्ठति न ।

42) 2.6.5.6(39)- न । वेपनः । (GS-2.6-17)

न वेपनो वेपनो न न वेपनः ।

43) 2.6.5.6(40)- वेपनः । भवति । (GS-2.6-17)

वेपनो भवति भवति वेपनो वेपनो भवति ।

44) 2.6.5.6(41)- भवति । अगा(3)न् । (GS-2.6-17)

भवत्यगा(3) नगा(3)न् भवति भवत्यगा(3)न् ।

45) 2.6.5.6(42)- अगा(3)न् । अग्नीत् । (GS-2.6-17)

अगा(3) नग्नी दग्नी दगा(3) नगा(3) नग्नीत् ।

46) 2.6.5.6(43)- अग्नीत् । इति । (GS-2.6-17)

अग्नी दिती त्यग्नी दग्नी दिति ।

47) 2.6.5.6(43)- अग्नीत् । (GS-2.6-17)

अग्नीदित्यग्नि - इत् ।

48) 2.6.5.6(44)- इति । आह । (GS-2.6-17)

इत्याहाहे तीत्याह ।

49) 2.6.5.6(45)- आह । यत् । (GS-2.6-17)

आह यद् यदाहाह यत् ।

50) 2.6.5.6(46)- यत् । ब्रूयात् ।

यद् ब्रूयाद् ब्रूयाद् यद् यद् ब्रूयात् ।

51) 2.6.5.6(47)- ब्रूयात् । अगन्न् ।

ब्रूया दगन् नगन् ब्रूयाद् ब्रूया दगन्न् ।

52) 2.6.5.6(48)- अगन्न् । अग्निः ।

अगन् नग्नि रग्नि रगन् नगन् नग्निः ।

53) 2.6.5.6(49)- अग्निः । इति ।

अग्नि रिती त्यग्नि रग्नि रिति ।

54) 2.6.5.6(50)- इति । अग्नौ ।

इत्यग्ना वग्ना विती त्यग्नौ ।

55) 2.6.5.6(51)- अग्नौ । अग्निम् ।

अग्ना वग्नि मग्नि मग्ना वग्ना वग्निम् ।

56) 2.6.5.6(52)- अग्निम् । गमयेत् ।

अग्निम् गमयेद् गमये दग्नि मग्निम् गमयेत् ।

57) 2.6.5.6(53)- गमयेत् । निः ।

गमयेन् निर् णिर् गमयेद् गमयेन् निः ।

58) 2.6.5.6(54)- निः । यजमानम् ।

निर् यजमानं ँयजमानम् निर् णिर् यजमानम् ।

59) 2.6.5.6(55)- यजमानम् । सुवर्गात् ।

यजमान(ग्म्) सुवर्गाथ् सुवर्गाद् यजमानं ँयजमान(ग्म्) सुवर्गात् ।

60) 2.6.5.6(56)- सुवर्गात् । लोकात् ।

सुवर्गा ल्लोका ल्लोकाथ् सुवर्गाथ् सुवर्गा ल्लोकात् ।

61) 2.6.5.6(56)- सुवर्गात् ।

सुवर्गादिति सुवः - गात् ।

62) 2.6.5.6(57)- लोकात् । भजेत् ।

लोकाद् भजेद् भजे ल्लोका ल्लोकाद् भजेत् ।

63) 2.6.5.6(58)- भजेत् । अगन्न् ।

भजे दगन् नगन् भजेद् भजे दगन्न् ।

64) 2.6.5.6(59)- अगन्न् । इति ।

अगन् निती त्यगन् नगन् निति ।

65) 2.6.5.6(60)- इति । एव ।

इत्येवैवे तीत्येव ।

66) 2.6.5.6(61)- एव । ब्रूयात् ।

एव ब्रूयाद् ब्रूया देवैव ब्रूयात् ।

67) 2.6.5.6(62)- ब्रूयात् । यजमानम् ।

ब्रूयाद् यजमानं ँ यजमानम् ब्रूयाद् ब्रूयाद् यजमानम् ।

68) 2.6.5.6(63)- यजमानम् । एव ।

यजमान मेवैव यजमानं ँ यजमान मेव ।

69) 2.6.5.6(64)- एव । सुवर्गम् ।

एव सुवर्ग(ग्म्) सुवर्ग मेवैव सुवर्गम् ।

70) 2.6.5.6(65)- सुवर्गम् । लोकम् ।

सुवर्गम् ँ लोकम् ँ लोक(ग्म्) सुवर्ग(ग्म्) सुवर्गम् ँ लोकम् ।

71) 2.6.5.6(65)- सुवर्गम् ।

सुवर्गमिति सुवः - गम् ।

72) 2.6.5.6(66)- लोकम् । गमयति ॥

लोकम् गमयति गमयति लोकम् ँ लोकम् गमयति ।

73) 2.6.5.6(67)- गमयति ॥

गमयतीति गमयति ।

=========

## 2.6.6 अनुवाकम् 6 – जटा

1) 2.6.6.1(1)- अग्नेः । त्रयः ।

अग्ने स्त्रय स्त्रयो ऽग्ने रग्ने स्त्रयः ।

2) 2.6.6.1(2)- त्रयः । ज्याया(ग्म्)सः ।

त्रयो ज्याया(ग्म्)सो ज्याया(ग्म्)स स्त्रय स्त्रयो ज्याया(ग्म्)सः ।

3) 2.6.6.1(3)- ज्याया(ग्म्)सः । भ्रातरः ।

ज्याया(ग्म्)सो भ्रातरो भ्रातरो ज्याया(ग्म्)सो ज्याया(ग्म्)सो भ्रातरः ।

4) 2.6.6.1(4)- भ्रातरः । आसन्न् ।

भ्रातर आसन् नासन् भ्रातरो भ्रातर आसन्न् ।

5) 2.6.6.1(5)- आसन्न् । ते ।

आसन् ते त आसन् नासन् ते ।

6) 2.6.6.1(6)- ते । देवेभ्यः ।

ते देवेभ्यो देवेभ्य स्ते ते देवेभ्यः ।

7) 2.6.6.1(7)- देवेभ्यः । हव्यम् ।

देवेभ्यो हव्य(ग्म्) हव्यम् देवेभ्यो देवेभ्यो हव्यम् ।

8) 2.6.6.1(8)- हव्यम् । वहन्तः ।

हव्यं ँवहन्तो वहन्तो हव्य(ग्म्) हव्यं ँवहन्तः ।

9) 2.6.6.1(9)- वहन्तः । प्र ।

वहन्तः प्र प्र वहन्तो वहन्तः प्र ।

10) 2.6.6.1(10)- प्र । अमीयन्त ।

प्रामीयन्ता मीयन्त प्र प्रामीयन्त ।

11) 2.6.6.1(11)- अमीयन्त । सः ।

अमीयन्त स सो ऽमीयन्ता मीयन्त सः ।

12) 2.6.6.1(12)- सः । अग्निः ।

सो ऽग्नि रग्निः स सो ऽग्निः ।

13) 2.6.6.1(13)- अग्निः । अबिभेत् ।

अग्नि रबिभे दबिभे दग्नि रग्नि रबिभेत् ।

14) 2.6.6.1(14)- अबिभेत् । इत्थम् ।

अबिभे दित्थ मित्थ मबिभे दबिभे दित्थम् ।

15) 2.6.6.1(15)- इत्थम् । वाव ।

इत्थं ँवाव वावे त्थ मित्थं ँवाव ।

16) 2.6.6.1(16)- वाव । स्यः ।

वाव स्य स्य वाव वाव स्यः ।

17) 2.6.6.1(17)- स्यः । आर्तिम् ।

स्य आर्ति मार्ति(ग्ग्) स्य स्य आर्तिम् ।

18) 2.6.6.1(18)- आर्तिम् । आ ।

आर्ति मा ऽऽर्ति मार्ति मा ।

19) 2.6.6.1(19)- आ । अरिष्यति ।

आ ऽरिष्य त्यरिष्यत्या ऽरिष्यति ।

20) 2.6.6.1(20)- अरिष्यति । इति ।

अरिष्यतीती त्यरिष्य त्यरिष्यतीति ।

21) 2.6.6.1(21)- इति । सः ।

इति स स इतीति सः ।

22) 2.6.6.1(22)- सः । निलायत ।

स निलायत निलायत स स निलायत ।

23) 2.6.6.1(23)- निलायत । सः ।

निलायत स स निलायत निलायत सः ।

24) 2.6.6.1(24)- सः । अपः । (GS-2.6-14)

सो(ओ1) ऽपो ऽपः स सो ऽपः ।

25) 2.6.6.1(25)- अपः । प्र । (GS-2.6-14)

अपः प्र प्रापो ऽपः प्र ।

26) 2.6.6.1(26)- प्र । अविशत् । (GS-2.6-14)

प्राविश दविशत् प्र प्राविशत् ।

27) 2.6.6.1(27)- अविशत् । तम् । (GS-2.6-14)

अविशत् तम् त मविश दविशत् तम् ।

28) 2.6.6.1(28)- तम् । देवताः । (GS-2.6-14)

तम् देवता देवता स्तम् तम् देवताः ।

29) 2.6.6.1(29)- देवताः । प्रैषम् । (GS-2.6-14)

देवताः प्रैषम् प्रैषम् देवता देवताः प्रैषम् ।

30) 2.6.6.1(30)- प्रैषम् । ऐच्छन्न् ।

प्रैष मैच्छन् नैच्छन् प्रैषम् प्रैष मैच्छन्न् ।

31) 2.6.6.1(30)- प्रैषम् ।

प्रैषमिति प्र - एषम् ।

32) 2.6.6.1(31)- ऐच्छन्न् । तम् ।

ऐच्छन् तम् त मैच्छन् नैच्छन् तम् ।

33) 2.6.6.1(32)- तम् । मथ्स्यः ।

तम् मथ्स्यो मथ्स्य स्तम् तम् मथ्स्यः ।

34) 2.6.6.1(33)- मथ्स्यः । प्र ।

मथ्स्यः प्र प्र मथ्स्यो मथ्स्यः प्र ।

35) 2.6.6.1(34)- प्र । अब्रवीत् ।

प्राब्रवी दब्रवीत् प्र प्राब्रवीत् ।

36) 2.6.6.1(35)- अब्रवीत् । तम् ।

अब्रवीत् तम् त मब्रवी दब्रवीत् तम् ।

37) 2.6.6.1(36)- तम् । अशपत् ।

त मशप दशपत् तम् त मशपत् ।

38) 2.6.6.1(37)- अशपत् । धियाधिया ।

अशपद् धियाधिया धियाधिया ऽशप दशपद् धियाधिया ।

39) 2.6.6.1(38)- धियाधिया । त्वा ।

धियाधिया त्वा त्वा धियाधिया धियाधिया त्वा ।

40) 2.6.6.1(38)- धियाधिया ।

धियाधियेति धिया - धिया ।

41) 2.6.6.1(39)- त्वा । वद्ध्यासुः ।

त्वा वद्ध्यासुर् वद्ध्यासु स्त्वा त्वा वद्ध्यासुः ।

42) 2.6.6.1(40)- वद्ध्यासुः । यः ।

वद्ध्यासुर् यो यो वद्ध्यासुर् वद्ध्यासुर् यः ।

43) 2.6.6.1(41)- यः । मा ।

यो मा मा यो यो मा ।

44) 2.6.6.1(42)- मा । प्र ।

मा प्र प्र मा मा प्र ।

45) 2.6.6.1(43)- प्र । अवोचः ।

